
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

उपाकर्मादि उत्सर्गकार्य नाम पारस्करगृह्ये

जि हारी कायार

॥ज्ञानमहूहासहस्र॥

॥श्रीगणेशाय नमः॥श्री॥ अथ श्रवणाकर्म लिख्यते॥ तत्र पारस्करः श्रावण्यां पौर्णमास्यां स्थालीपाकं
॥श्रपयित्वा कृतधानाश्चैककपालं पुरोडाशं धानानां भूयसीः पिष्ट्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोत्यपः श्वे
प्रजा तपदाजहि पूर्वेण चापरेण चा सप्त च वारुणीरिमां प्रजाः सर्वाश्च राजबांधवैः स्वाहा॥ न वै श्वेतस्याध्याचारे हि
न र्ददर्श कंचन श्वेताय वैदर्व्याय नमः स्वाहेति स्थालीपाकस्य जुहोति विस्रवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्य व
श्चेति धानावंतमिति धानानां घृताक्तान्सक्तून्सर्पेभ्यो जुहोति आग्नेयपांडुपार्थिवानां सर्पाणा मधिप
तये स्वाहा श्वेतवायवांतरिक्षाणां सर्पाणामधिपतये स्वाहाभिभूः सौर्यदिव्यानां सर्पाणामधिपतये स्वा
हेति सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति प्राश्नातो स सक्तूनामेकदेशं शूर्पे न्युप्योपनिष्क्रम्य व
हिः शालायाः स्थंडिलमुपलिप्योल्कायां ध्रियमाणायां मांतरा गमतेत्युक्त्वा वाग्यतः सर्पानवनेजयति आ
आग्नेयपांडुपार्थिवानां सर्पाणामधिपतेऽवनेनिक्ष्व श्वेतवायवांतरिक्षाणां सर्पाणामधिपतेऽवनेनिक्ष्वा

र्यो

भिभूः सौर्यदिव्यानां सर्पाणां[illegible]मधिपतेऽवनेनिक्ष्वेति यथावनिक्तं दर्व्योपघातं सक्तून्सर्पेभ्यो बलिं हरति
आग्नेयपांडुपार्थिवानां सर्पाणामधिपत एष ते बलिः श्वेतवायवांतरिक्षाणां सर्पाणामधिपत एष ते बलिर
व भिभूः सौर्यदिव्यानां सर्पाणामधिपत एष ते बलिरित्यवनेज्य पूर्ववत्कंकतैः प्रलिखत्याग्नेयपांडुपार्थिवानां स
ब र्पाणामधिपते प्रलिखस्व श्वेतवायवांतरिक्षाणां सर्पाणामधिपते प्रलिखस्वाभिभूः सौर्यदिव्यानां सर्पाणाम
धिपते प्रलिखस्वेत्यंजनानुलेपनं स्रजश्चांजस्वानुलिंपस्व स्रजोपिनह्यस्वेति सक्तुशेषं स्थंडिले न्युप्योदपा
त्तीयोप त्रेणोपसिंचति नमोस्तु सर्पेभ्य इति तिसृभिः स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्संततयोदधा कृ
रया निवेशनं त्रिः परिषिंचन्परीयादपश्वेतपदाजहीति द्वाभ्यां दर्वीं शूर्पं प्रक्षाल्य प्रतप्य प्रयच्छती द्वारदेशे दे
मार्जयंते आपो हि ष्ठेति तिसृभिरनुगुप्तमेतं सक्तुशेषं निधाय ततो स्वमितेऽग्निं परिस्तीर्य दर्व्योपघातं सक्तू तमिते
न्सर्पेभ्यो बलिं हरेदाग्रहायण्यास्तं हरंतं नांतरेण गच्छेयुर्दर्व्याचमनं प्रक्षाल्य निदधाति धानाः

आहुत्यंते सद्रः स्मृतास्ततो ब्राह्मणभोजनमिति ॥ अथातः श्रवणाकर्म अथशब्दः प्रकरणविच्छेदार्थः अतः शब्दस्य हेत्वर्थः यतः आवसथ्याग्निसाध्यानि कर्माणि प्रतिज्ञातानि श्रवणाकर्म चावसथ्याग्निसाध्यं अतः श्रवणाकर्म व्याख्यास्यत इति सूत्रशेषः ॥ श्रावण्याः पौर्णमास्याः श्रवणयुक्तायां पौर्णमास्यां कर्त्तव्यमिति शेषः ॥ तथा च हिरण्यकेगृह्ये अथातः श्रवणाकर्म तद्यथा पौर्णमासी श्रवणेन युज्यात्तस्यामुपरिष्टात्सायमग्निहोत्रस्य दक्षिणाग्निमुपसमादधात्यौपासनमनाहिताग्निरथोपकल्पयते इत्यादि ॥ यदि यदि श्रवणायुक्ता न लभ्यते तदा श्रवणरहितापि श्रावणपौर्णमासी ग्राह्या ॥ अथातः श्रवणाकर्मस्यां कृत्यमिति गोभिलः गृह्ये पौर्णमासीमात्रस्योपादानात् ॥ यदि पुनः तस्यां पौर्णमास्यां सूतकादिना कर्तुं न शक्यते तदा आग्रहायणीपर्यंतं यदा कदाचिद्दृष्टिवर्जमशेषतः इति कर्तव्यं तदाह छंदोगपरिशिष्टे कात्यायनः ॥ श्रवणाकर्मस्तु सर्पिः सूतकादिकं ॥ आग्रहायणिकं कुर्याद्दृष्टिवर्जमशेषत इति ॥ आग्रहायणिकमित्येवं पदच्छेदः ॥ स्थालीपाकं श्रपयित्वा स्था

लीपाकं चरुं श्रपयित्वा अक्षतधानाश्च अक्षताः यवाः तत्संपाद्याः धानाः अक्षतधानाः चकारात् श्रपयित्वा श्रपणेन संपाद्या तदुक्तं छंदोगपरिशिष्टे अक्षतास्तु यवाः प्रोक्ताः भृष्टा धाना भवंतीति इति द्वा धानाशब्दस्य भ्रयवमात्रवाचकत्वात् धानाः श्रपयित्वेति अनेन निरुक्तविषयस्यापि श्रपणप्रसक्तौ निरासाय कंडनादिजन्यक्षतशून्यार्थकस्याक्षतपदस्योपादानं एवं च कंडनादिजन्यक्षतशून्यैः सतुषयवैः धानाः संपाद्येत्यर्थः ॥ धानाश्चकर्परेण भवंतीति धानार्थं कर्परं चरुस्थाल्यानंतरं आसादनीयं अर्थवशात्सादे रूपेनेन प्रयोजनवतां सर्वेषामेवासादनस्योक्तत्वात् वक्ष्यमाणपुरोडाशार्थकपालं च कर्परानंतरमेवेति ॥ एककपालं पुरोडाशं एकस्मिन् कपाले संस्कृतः एककपालः तं एककपालं श्रपयित्वेत्यनुवर्तते ते स च पुरोडाशः ॥ अंगुष्ठपर्वपरिमाणात् न्यूनाधिक्यासंभवात् न परिमाणोक्तिः कार्या ॥ पुरोडाशपरिमाणस्य तत्रथैव दृष्टत्वात् तथा च दर्शपूर्णमासप्रकरणे स्मृतिः ॥ अंगुष्ठपर्वमात्रं कुर्यादित्युद्देशे आहुः क

स्तद्देवपाशानश्वशफो यावंतमेवस्यथमनसानसेश पृथुं मन्येत तेवं कुर्यादिति। कपालमपितावत्परिमाणं
उरुप्रथाइत्ति प्रथस्वेति यावत्कपालमनातिपृथुमिति कात्यायनेन पुरोडाशपृथुत्वस्य कपालपरिमि
तत्वबोधनात्। अत्र स्थालीपाकादिहोमानां इति कर्तव्यताविशेषश्रवणेनापूर्वत्वस्य व्यवस्थि
तत्वादिहव्यपुरोडाशादिधर्माणां अश्रवणात् पुरोडाशादिश्रपणस्वरूपसंपादकमात्रेति कर्त
व्यता पुरोडाशादयः कर्तव्याः साच संपकन कपालाद्युपाधानाधिश्रपणप्रथनश्रपण
दिकमंतरेणापि सिद्धिविश्वमुपादाय पुरोडाशादिस्वरूपनिष्पत्तिसंभवेऽन्यथानुपपन्नत्वा
भावेन पुरोडाशादिश्रपणविधेस्तदाक्षेपत्वादिति। धानानां भूयसीः पिष्ट्वा धानानां भज्ये
भूयसीः धानाः दृषदुपलाभ्यां पिष्ट्वा दृषदुपलेवार्थपरिमाणे भवतः॥ एतश्चपेषणं आ
ज्यधाना पुरोडाशवदास्याज्यमुत्पूयावेक्ष्य प्रोक्षणीश्रोतूषपक्ष्यात्कर्तव्यमितिहरिहरः। धा

नोद्धासनोत्तरं भवतीनुकश्चित्। आज्यभागाविष्ट्वाज्याहुती जुहोत्येत यदा जहिन वैश्वेतस्या
ज्याधारहति द्वाभ्यां मात्राभ्यां प्रतिमंत्रं द्वे आहुती जुहो। पाकयज्ञे घवत्तस्यासर्वहोम इति पू
र्वलिखितसूत्रात् सर्वत्र संस्त्राबस्यापनं च कार्यं स्थालीपाकस्य जुहोति विष्णवे श्रवणाय
श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति। स्थालीपाकस्यचरोः विष्णवे स्वाहा श्रवणाय स्वाहा
श्रवण्यै पौर्णमास्यै वर्षाभ्यः स्वाहेत्येवं चतसृ आहुतीर्जुहोति धानानां। धानावंतं करंभिण
मित्येतया ऋचाधानावामेकामाहुतीं जुहोति घृताक्तान्सक्तून्सर्पेभ्यो जुहोति आग्नेयपां
डुपार्थिवानां सर्पाणामधिपतये स्वाहा श्वेत वायवांतरिक्षाणां सर्पाणामधिपतये स्वाहा अभि
भूः सौर्य दिव्यानां सर्पाणामधिपतये स्वाहा कृशोनाकोन् आज्येन अभ्यक्तान् सक्तून्स
र्पेभ्यः आग्नेयपांडुपार्थिवानामित्यादिभिः त्रिभिर्मंत्रैः प्रतिमंत्रं जुहोति। एतश्चांजनर्थे

माऽयं लौकिकं यासंनसंस्कृतं विषये लौकिकमयुक्तत्वादित्यादिना कात्यायनेन तथैवान्यथ स्थाप-
पनात्। नन्वत्र सूत्रे सर्पेभ्य इत्यवाच्यं मंत्रलिंगादेव सर्पाणां देवतात्वसिद्धेरिति चेन्न। विजा-
तीयस्यापि स्वविजातीयाधिपत्यसत्त्वेन सर्पविजातीयस्यापि सर्पाधिपस्य संभवात्सर्पा-
धिपतित्वेन रूपेण सर्पभिन्नमुद्दिश्य यागकरणानिराकरणाय सर्पविशेष एव सर्पाधिपति-
रिति बोधनार्थं सर्पेभ्य इत्यस्य उपादानात्। अथ विजातीयस्य स्वविजातीयाधिपत्यं न क्वा-
पि दृष्टमिति चेन्न अग्निर्भूतानामधिपतिः स मावत्विंद्रो ज्येष्ठानामयं मः पृथिव्या वायु-
रंतरिक्षस्य सूर्यो दिवश्चंद्रमा नक्षत्राणामित्यादौ बहुषु तद्दर्शनात्। सर्वहुतमेककपालं ध्रु-
वाय भौमाय स्वाहेति सर्वहुतं यथास्यात्तथा एककपालं पुरोडाशं ध्रुवाय भौमाय स्वाहेति जु-
होति प्राशनांते सक्तूनामेकदेशं सूर्पे सृप्योपनिष्क्रम्य प्राशनांते चरुधीनां सक्तूनामेक-

स्विष्टकृदादि संस्रवप्राशनांते सक्तूनामेकदेशो सूर्पे प्रक्षिप्य सूर्पं चात्र ऽवशेषो कान्यत्तमसमयं श्रो-
ते तन्मयस्येव दद्वात्तत्र्य था चदर्शपूर्णमासप्रकरणे व्रक्तिः। अथ सूर्पमादत्ते वर्षवृद्धमसीति व-
र्षवृद्धं सीतत्प्रादिनेमानायत्रिवेणू वांपदीषीकानामिति समीप एव शालातो बहिर्गत्य। बहिः शा-
लायां स्थंडिलमुपालिप्य शालाबहिः स्थंडिलं गोमयं मध्ये उद्धृत्य एतत्खंड पल्लेपनं स्वयमेव वक्तव्यं
तस्य पदार्थतया विहितत्वात् कर्तृविशेषस्य चानुक्तत्वात्। निष्क्रमणे पल्लेपनयोः पूर्वं तेनोपा-
दानात्। निष्क्रमणे न सहसमानकर्तृकत्वं त्वाभावा उक्तायां ध्रियमाणायां मात्रराग मे ते युक्ता
वाग्यतः सर्पानवनेजयत्याग्नेयोर्ज्वलंतिका स्थादावन्येन ध्रियमाणे आवसथ्यस्य मम-
धांतरा मा गच्छत इत्यर्थकं मांतरं गमत इति प्रैषमभिधाय मो नीसर्पान् आग्नेय स्वेत अभि-
भूरित्यादिभिरवनेनिक्ष्वेत्यंतैस्त्रिभिर्मंत्रैः प्राक्संस्थमवनेजयति। यथा वाग्नीक्रं दर्पोपघरि

सकृन्नु सर्वेभ्यो बलिं हरत्यग्नये इत्यादि। अवनेजनक्रमेण दर्व्या भिक्तु उपहत्य सर्वेभ्यो बलिं अग्नये इत्यादि
भिः शेषलैः बलिं रित्यैः तैर्मंत्रैः प्रतिमंत्रं ददाति॥ उपधानमिति न मूलमस्य यातः उपपूर्वो हरतिर्ग्रहणार्थः॥ अथ
स्कन्देऽग्नि पहरेत्यादि श्रुतौ दर्शनान्नु दर्व्याः परिमाणादिकं तु छांदोगपरिशिष्टे कात्यायनेनोक्तं॥ इध्मजाती
यमिध्मार्द्धप्रमाणमेक्षणं भवेत्॥ वृत्तं वार्क्षं च पृथ्वग्रमवदानक्रियाक्षमं॥ एषैव दर्वी यस्तत्र विशेषस्तमहं
ब्रुवे दर्वी द्व्यंगुष्ठपृथ्वग्रा तुरीयोनं च मेक्षणमिति॥ इध्मजातीयं खादिरं पालाशं वा बिभीतकादि वर्जयित्वा
त्विद्धनस्पतिमयं वा॥ तथा च गोभिलः॥ अथेध्मानुपकल्पयते खादिरान्वा पालाशान्वा खादिरपालाशा
ले मे बिभीतकतिल्वकबाधकनीपनिंबराजवृक्षशाल्मल्यरलुदधित्थकोविदारश्लेष्मातकवर्जं स
र्ववनस्पतीनां मिध्मो यथार्थं स्यादिति इध्मार्द्धप्रमाणं आदेशप्रमाणं इध्मस्य प्रादेशद्वयपरिमि
तत्वात्॥ तदाहच्छंदोगपरिशिष्टे कात्यायनः॥ प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्तितमिति॥ वृत्तं

वर्त्तुलदंडं वार्क्षं वृक्षकाष्ठनिर्मितं न तु लत्ताभवं॥ पृथ्वग्रं स्थूलाग्रं॥ अवदानक्रियाक्षमं॥ अवदानग्रहण
योग्यं॥ एषैव दर्वी या ह्यवदानेक्षणमुक्तं तादृश्येव दर्वी यस्तत्र विशेषः यः दर्वीगतो विशेषस्तमहं ब्रुवे
महं वदामि॥ दर्वी द्व्यंगुष्ठपृथ्वग्रा अंगुष्ठपृथ्वग्रा अंगुष्ठपरिमितं पृथु विस्तीर्णं अग्रं यस्याः सा द्व्यं
गुष्ठपृथ्वग्रा दर्वी भवति॥ तुरीयोनं च मेक्षणं द्व्यंगुष्ठचतुर्थांशन्यूनपरिमाणपृथ्वग्रं मेक्षणं भवति
एवं च प्रादेशपरिमाणायद्व्यंगुष्ठपरिमिता पृथ्वग्रा खादिरपालाशादिमूलदंडे संदघाद दर्वी भवति॥
अवनेज्य पूर्ववत्कंकतैः प्राक्संस्थं त्वाग्नेयपांडुपार्थेवाना मिति॥ पूर्ववदवनेजनं दत्वा त्रिभिः कंक
तैः एकतो दंतैः आग्नेयेत्यादिभिस्त्रिभिर्मंत्रैः प्रतिमंत्रं प्रति बलिं प्राक्संस्थानि कंडूयति॥ तत्र कं
कत मिति दरिहरा॥ वारणान्यहोमसंयुक्तानीति कात्यायनपरिभाषातो वारणमेव भक्तीस्य
न्ये अजनानुलेपनं स्वजन्यांजनस्वनुलिपस्व सजोपि न स्वस्वेति॥ अंजनं कज्जलं सौवीरं वा

।उभाभ्यामपि चक्षुषः।स मंजनदर्शनात्।अनुलेपनं।घृष्टसुरभिचंदनादि।स्रक्‌पुष्पमाला।अञ्जन
येत्यादिमंत्रैः।अंजस्वानुलिंपस्व स्रजोपिनह्यस्वेत्येत्याहुः।सक्तुशेषदृढं स्थंडिले नुपोदपात्रेणो
पनिनीयोपतिष्ठते नमोस्तु सर्पेभ्य इति तिसृभिः।नमोस्तु सर्पेभ्य इति तिसृभिः ऋग्भिः स
र्पानुपतिष्ठते बल्यभिमुखः प्राङ्मुखः।तिष्ठन्नमोस्तु सर्पेभ्य इत्यादीन्मंत्रान्पठतीत्यर्थः।
स यावत्कामयेतेन सर्पा अभ्युपयुरिति तावत्संततयदधारया निवेशनं त्रिः परिषिंचन्परिया
द्यः।स्विन्न पादाजहीति द्वाभ्यां।स गृहपतिः यावंतं देशं सर्पा न संचरेयुरितीच्छेत्।तावंतं दे
शं अविछिन्नया उदकधारया गृहं वा रत्नयं परिषिंचन गच्छेत्।अपश्वेत पदाजहीति द्वाभ्या
मंत्राभ्यां।तत्राद्यं परिक्रमणं मंत्रेण द्वितीयस्तृतीयश्च तरच्छीमेवा एक इत्येकर्मावृत्तौ सकृन्मं
त्रवचनमिति कात्यायनसूत्रात्।दर्वी सूर्पं च प्रक्षाल्य प्रतप्य प्रयच्छतीदर्वीं सूर्पं च प्रक्षाल्य

त्नु इत्वा तापयित्वा प्रयच्छेत्।तापनं च सान्निधानादुल्काया भवप्रधानमप्युल्का धारयेवं तिकर्कः।द्वा
रदेशे सार्जयम आपोहिष्ठेति तिसृभिः शालाया द्वारे आपोहिष्ठा पो वः शिवतमः स्तस्मा अरं गमा
मव इति तिसृभिः ऋग्भिः उदकेनात्मानमभिषिंचति।मार्जयेत इति बहुवचनोपदेशाद्भृत्यजन
मानोल्का धारकाः।अनुगुप्तमेत सक्तुशेषं निधाय सुरक्षितप्रदेशे होमावशिष्टान्सक्तून्निधा
य।ततोस्तमितेस्तमितेग्निं परिचर्य व्योपध्यात् दृं सक्तून्सर्पेभ्यो बलिं हरेदाग्रहायण्याः।ततः
ते ऽकालमारभ्य तत्तस्तेभ्य सक्तुभ्य इति कर्कः।प्रतिदिनं आवसथ्ये सायंहोमेन समाराध्य अस्त
मिते सूर्ये दर्व्या गृहीत्वा सूर्पेनुप्तान् सक्तून् सर्पेभ्यो बलिं हरेत्।आग्रयण्याः पौर्णमासीं यावत्।बलिदानं
चाग्नेजनादिमत्यवनेजनांतं भवतीति कर्कः।उपलेपनादि रेखाकरणांतमिति हरिहरः।तदृं हरंतं नो
तरेण गच्छेयुः।तं गृहपतिं बलिं हरंतं तस्या वसथ्यस्य चांतरेण न गच्छेयुः प्राणिनः।ततः श्वादयो

पि निवार्या। दर्व्याचमनं प्रक्षाल्याति दधाति। दर्व्या आचमनं प्रक्षाल्य ते अनेनेति करणव्युत्पत्त्या आचमनं मुखं तत्
प्रक्षाल्य स्थापयति। दर्व्या मुखं प्रक्षाल्य स्थापयतीत्यर्थः। एवं प्रक्षाल्यनं प्रत्यहं भवति बलिदानं
संलग्नसक्तुनिर्णेजनार्थत्वात् सक्तुसंबंधस्य च प्रत्यहं भावात्। दर्वीमुखप्रक्षालनस्योपदेशात् सू
र्यप्रक्षालनस्यानुपदेशात् सूर्यप्रक्षालनाभावः। धानाः आज्ञीतंस्य सक्तवः। धाना भर्जिता यवाः तान्
अंतिभक्षयंति अप्सरसः स्यूताः दन्ते रजवस्वतिताः ततो ब्राह्मणभोजनं। तत्र एकस्य ब्राह्मणस्य भोजनं
मित्यर्थः। यद्यपि प्रत्यहं क्रियमाणमिदं सर्पबलिसमित्तमेव कर्मेति श्रवणाकर्मप्रतिपादनावसरेन प्रति
पादयितुमुचितं तथापि श्रवणाकर्मसंबंधत्वात् द्रव्योपजीवित्वेन सूत्रकृता श्रवणाकर्मप्रतिपादनावस
रे [illegible] पादितत्वात् प्रतिपादितत्वात् प्रतिपादितमिति। अथ प्रयोगः॥ तत्र श्रावण्यां
पौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा आवसथ्याग्नेः

पश्चात् प्राङ्मुखः पत्न्या सह उपविश्य अद्येत्यादिदेशकालादिकं संकीर्त्य श्रवणाकर्माहं करिष्ये
इति संकल्पं कुर्यात्। ततः अग्नेरुपद्रुतिकारलिखनात् देवताभिधानं कुर्यात्। तद्यथा श्रवणाकर्मणा
हं यक्ष्ये तत्र प्रजापतिमिंद्रमग्निं सोमं श्वेतपदं श्वेतवेदर्व्यघतेन विष्णुं श्रावणं श्रावणीं पौर्णमासीं वर्षा
श्च रुणाद्रं धानाभिः अग्नये पांडुपार्थिवानां सर्पाणामधिपतिं श्वेतवायवांतरिक्षाणां सर्पाणा
मधिपतिं अभिभूः सौर्य दिव्यानां सर्पाणामधिपतिं सक्तुभिः ध्रुवं भौमं पुरोडाशेन अग्नि
स्विष्टकृतं रुधानासक्तुशेषे आग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ आग्निं अयसं वरुणं
सवितारं विष्णुं विश्वान्मरुतः स्वर्कान् वरुणं मदितिं प्रजापतिं आज्येनाहं यक्ष्ये इति चिंतयेत्।
ततो अग्न्युपवेशनादि आज्यभागांतं पूर्वोक्तप्रकारेण कुर्यात्। ततः पात्रासादनादौ विशेषः चरुस्था
ल्यनंतरं भर्जनकर्परं तत एकं कपालं क्रियमाणपुरोडाशपरिमाणं तंडुलानंतरं तरपवान् ततः सक्तु

लपि स्थानि। एवं पात्राण्यासाद्य अन्यान्यपि पात्राण्युपकल्पयेत्। दृषदुपले शूर्पोल्केऽका
धारकास्य उदपात्रं दर्वीकंकतत्रयं अंजन अनुलेपनं स्रजश्चेति। ततः पवित्रकरणादि द्रुप्रोक्षणी
निधानांते चरोः स्थानादुत्तरतः अग्नेर्भर्जनकर्परं अधिश्रित्य तदुत्तरतः अंगारं स्थापयित्वात
दंगारा तदंगारोपरि कपालमुपदध्यात्। तत्कपालोपरि पुनरुद्यम। कार्थं अंगारं तिदध्यात्। तत आ
ज्यास्थाल्यामाज्यं निरूप्य चरुस्थाल्यां प्रणीतोदकमासिच्य तंदुलान्प्रक्षिप्य प्रणीतोदके
न पिष्टान्स्यपत्य अश्वशफ परिमाणं पात्रपरिमाणं वा अत्यधिक परिमाणता नलं गमितावत्परि
माणं वा पुरोडाशं कुर्यात्। ततः युगपदाज्यादीनां सर्वेषां अधिश्रपणं। तत्र आज्यं ब्रह्माधिश्रपति
चरुं होमकर्त्ता। अन्यः कश्चित्कर्मकरः धानाः। कपाले पुरोडाशं श्रपयति। यः पुरोडाशमधिश्रपणं क
रोति स आधेयस्य ग्णोत्तरं पुरोडाशस्य प्रथमनमपि करोति। प्रथनं च यावत्कपालं पुरोडाशस्य

प्रथनमपि करोति। प्रथनं च यावत्कपालं पुरोडाशस्य विस्तारणं। ततः होमकर्त्ता सर्वेषां पर्यग्निकरणं करो
ति। ततः स्रुवं संमृज्य आज्यमुक्तप्रकारेणोद्वास्य चरुं चोद्वास्य आज्यस्योत्तरतः स्थापयित्वा धाना उद्वास्य च
रोरुत्तरतो निधाय पुरोडाशमुद्वास्य धानामुत्तरतः स्थापयेत्। तत आज्योत्पवनावेक्षणप्रोक्षण्युत्पवना
नि कृत्वा भूयसीं दर्भान्वा दृषदुपलाभ्यां पिष्टा स्वल्पा धानाः पृथक् स्थापयित्वा लौकिक घृतेन सक्तुन्ना
पद्धति कारा लिखनात् हरेत् स्थाल्याज्येनैव तदक्ता उपयमन कुशादानादि आज्यभागांतं कर्म कुर्यात्
। ततः स्रुवेणाज्यस्थाल्या आज्यं गृहीत्वा अपन्वेतपदा जही त्यस्य प्रजापति ऋषिः लिंगोक्तदेवता
यजुः इति स्मृत्वा आपन्वेत पदीजहि पूर्वेण चापरेण सप्तवारुणीरिमाः प्रजाः सर्वाश्च राजबांधवैः स्वा
हेति जुहोति। इदं श्वेत पदे न ममेति त्यागः। तथैव कृष्यादिकं स्मृत्वा न वेश्वेतस्या ध्याचारे दर्शकं च नश्वे
ताय वैदर्व्याय नमः स्वाहेति पुनस्तथैव जुहोति। इदं श्वेताय वैदर्व्याय न मम इति त्यागः। ततः स्थालीपाक

स्थ वनस्त्र आहुती जुहोति तद्यथा विष्णवे स्वाहा इदं विष्णवे न मम। श्रवणाय स्वाहा श्रवणायेदं न मम। श्रावण्यै
पौर्णमास्यै स्वाहा इदं श्रावण्यै पौर्णमास्यै न मम। वर्षाभ्यः स्वाहा इदं वर्षाभ्यो न मम। ततो धाना अभिघार्य स्रु
वेणादाय धानावंतमित्यस्य प्रजापतिर्ऋषिः सरस्वतीद्राक्षयः त्रिष्टुप्छंदः इंद्रो देवता होमे विनियोगः इति
स्मृत्वा धानावंतं करंभिणमपूपवंतमुक्थिनं इंद्र प्रातर्जुषस्व नः स्वाहेति होमः इदमिंद्राय न
मम इति त्यागः। ततः सक्तून् स्रुवेणादाय आग्नेयं पांडु पार्थिवानामित्यस्य परमेष्ठी ऋषिः लिंगो
क्तदेवता यजुः होमे विनियोगः इति स्मृत्वा आग्नेय पांडु पार्थिवानां सर्पाणामधिपतये स्वाहेति
होमः इदं श्वेतवायवांतरिक्षाणां सर्पाणामधिपतये न मम इति त्यागः। पुनस्तथैव अभ्यादिकं
स्मृत्वा अभिभूः सौर्यो दिव्यानां सर्पाणामधिपतये स्वाहेति होमः इदं अभिभूः सौर्य दिव्यानां सर्पा
णामधिपतये न मम इति त्यागः। ततः पुरोडाशमभिघार्य संपूर्णं पुरोडाशं स्रुवेण गृहीत्वा ध्रुवाय भौमा

य न मम इति त्यागः। ततः चरुं धाना सक्तूनामुत्तरार्द्धात् मध्यात् सकृत्सकृदवदानत्रयं गृहीत्वा अग्नये
स्विष्टकृते स्वाहेत्युत्तरार्द्धे जुहोति इदमग्नये स्विष्टकृते न मम इति त्यागः। ततो महाव्याहृतिहो
मादि ब्राह्मणे दक्षिणादानांतं कुर्यात्। ततो हुतशेषं सक्तूनामेकदेशं शूर्पे गृहीत्वा उदकपात्रं दर्वीकं
च तत्र यं अंजनं अनुलेपनं स्रजं आदाय सपत्नीको ब्राह्मणेन उल्काधारेण च सह गत्वा या उदीच्यां दिशि
प्राच्यां दिशि वा स्थंडिलं कृत्वा तदुपलिप्य उल्काधारकेण लौकिकामुल्कां यां ध्रियमाणायां मांतरा
गमनं इति प्रैषं दत्वा वाग्यत उदपात्रोदकेन आग्नेयं पांडु पार्थिवानां सर्पाणामधिपतये अवनेनिक्ष्व
इति स्थंडिले अवनेज्यात् दर्व्या तदवनेजनदेश पूर्वतः स्थंडिले एवं पुनः श्वेतवायवांतरिक्षाणां सर्पाणाम
धिपतेऽवनेनिक्ष्वेति अवनेज्य अभिभूसौ उदपात्रं निदध्यात्। ततो दर्व्या सक्तून् शूर्पादादाय आग्नेयपां
डु पार्थिवानां सर्पाणामधिपत एष ते बलिः श्वेतवायवांतरिक्षाणामधिपत एष ते बलिरित्यभि

मंत्रैरवनेजनकर्म गत्वा तत्स्थाने बलीन् दद्यात्। ततः पूर्ववदवनेजनं कृत्वा आग्नेयपांडुपार्थिवानामिः सर्पा
णामधिपतिरित्यादिभिः आलिखेत्यंतैस्त्रिभिर्मंत्रैः कंकतयेण प्रतिबलिं प्रतिमंत्रं प्रत्यंजलिं अनुलेप
नं ददाति। पुनस्तैरेव मंत्रैः स्रजोपिनह्यस्वेत्यंतैः प्रतिबलिं पुष्पमालां ददाति। अथ वा अंजस्वेति
अंजनदानं। अनुलिंपस्वेति अनुलेपनदानं। स्रजोपिनह्यस्वेति मालादानं न पूर्वमंत्रानुषंग इति। ततः
सक्तूशेषं स्थंगिले प्रक्षिप्य उदपात्रस्थं जलेन प्लावयेत्। ततः नमोस्तु सर्पेभ्य इति तिसृणां साध्या
कृषयः सर्पा देवता अनुष्टुप् छंदः उपस्थाने विनियोगः इति स्मृत्वा नमोस्तु सर्पेभ्यो ये के च पृथि
वीमनु ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः। या इषवो यातुधानानां ये वा वनस्पतींरनु ये वावटेषु शे
रते तेभ्यः सर्पेभ्यो नमः। ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो
नमः इति तिसृभिः ऋग्भिः सर्पानुपतिष्ठेत्। एतावद्देशं सर्पा न प्रविशेयुरिति यावत्कामयेत ता

वंतं देशं संततयोदकधारया परिषिंचन् गृहं त्रिः परीयात्। तत्र आद्यं परिक्रमणं कृष्यादिस्मरणपूर्वकं अ
पश्वेतेति पराजहीति पूर्वं लिखितमंत्राभ्यां उत्तरं परिक्रमणं द्वयं च तूष्णीं। दर्वीं शूर्पं च प्रक्षाल्य उल्का
धारिणे प्रयच्छति। ततः शालाया द्वारि उपविश्य आपो हि ष्ठेत्यादीनां सिंधुद्वीप ऋषिः गायत्री छं
दः आपो देवता मार्जने विनियोगः इति स्मृत्वा आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणा
य चक्षसे यो वः शिवतमो रसतीरिव मातरः तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो ज
नयथा च नः। इति तृचेन ब्रह्म यजमानोल्काधाराः स्वस्वात्मानं जलेन मार्जयंते। ततो ब्रह्म यज
मानोल्कधारा अनवरवं यंतः ध्नाः प्राश्नंति। ततः एकं ब्राह्मणं भोजयेत्। सक्तूशेषं च सुगु
प्तोदेशे निदध्यादिति॥ ॥इति श्रवणाप्रयोगः समाप्तः॥ ॥अथ सर्पबलिहरणप्रयोगः॥
अस्तमिते सूर्ये सायंहोमानंतरं पूर्ववत् सक्तून् कृत्वा दर्वीं कंकतं उदपात्रं च गृहीत्वा सपत्नीकः सो

काधारो बहिः शालायां गत्वा स्थंडिलोपलेपनादि परिलेखनांतं बलिहरणं प्रतिदिनं पूर्ववत्कुर्यात्।
मांतरागमनेतिशेषाभावः। न कश्चिदंतरागच्छेत् दर्विमुखस्यैव प्रक्षालनं न संपूर्णदर्व्याः शूर्पस्य च
॥ एवं आग्रहायण्यापर्यंतं कुर्यादिति बलिहरणप्रयोगः॥ अथेंद्रयज्ञाख्यं कर्म। तत्र पारस्करः। प्रो
ष्ठपद्यामिंद्रयज्ञः पायसमैंद्रं श्रपयित्वापूपांश्चापूपैस्तीर्त्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति
इंद्रायेंद्राण्या अजायैकपदे अहिर्बुध्न्याय प्रोष्ठपदाभ्यश्चेति वचनात्। भूरुज्योतिरिति प्रतिमंत्रं दर्विमुखे
न च मभसानामान्येषामेतान्नेति सूत्रे इंद्रदेवीरिति जपतीत्यत्रापि॥ अथातः श्रवणाकर्म श्रावण्यां पौ
र्णमास्यां यद्यप्यंप्रोष्ठपदसंबंधिनी या काचित्तिथिः प्रतीयते तथापि अथातः श्रवणाकर्म श्रावण्यां
पौर्णमास्यामित्युपक्रम्य प्रोष्ठपद्यामिंद्रयज्ञः। अश्वयुज्यां पृषातकाः इति विधानात् प्रोष्ठप
द्यादिभिः पदैः पौर्णमास्येवाविशेष्यत्वेनोपातीयते तस्यामिंद्रयज्ञाख्यं कर्म भवति। पायसमैं

द्रं। श्रपयित्वापूपांश्चापयत्सानिष्यादि तं चरुं परमान्नमियावत् पृषदाज्यं सदध्याज्ये परमा
न्नं तु पायसमिति कोशात्। ऐंद्रं इंद्रदेवतं श्रपयित्वा पक्त्वा पायसं श्रपयित्वेत्येतावतैव सिद्धे ऐं
द्रमिति देवतातद्धितनिर्देशस्तद्देवत्यहोमविधानार्थः। अवसरस्तु परिस्तरणादूर्ध्वं तेन पायसश्रप
णार्थं दुग्धस्याग्निप्रणयनं अत्र कार्यं उपदेशात् देशयोरभावात् दुग्धस्य प्रणयनमित्यपि केचित्।
अपू पांश्च पोलिका परपर्यायान् चकारात् श्रपयित्वा पयः पोलिका पोलिपूका इत्याभिधानाचिं
तामणिः। अपूपो रसमंडक इत्यस्य काप्रकरणे कर्कटांश्चतुरः कुर्यात् प्रातिदिशं स्तरणार्थं इति हरीद
रिहरः। अन्ये तु यावद्भिरास्तरणं उपपद्यते तावन्त अपूपानाहुः। अपूपैस्तीर्त्वाज्यभागावि[illegible]ज्या छू ८
हुतीर्जुहोतीइंद्रायेत्यादि। अपूपैरर्थात्। अग्निं स्तीर्त्वेति तत आज्यभागाविष्ट्वा इंद्रायेत्याद्याभ्या
ज्याहुतीर्जुहोति। अपूपास्तरणं प्राङ्न्यायाहुतिभ्यः। स्विष्टकृदन्य[illegible]दाज्याद्धाविरिति सूत्रेण महा

व्याहृतिहोमात्प्राक् स्विष्टकृद्धोमेन भवितव्यं नेच प्रधानं अहुत्वा स्विष्टकृद्धोमस्ततः कर्तुं श
क्यते शेषात्स्विष्टकृते समवद्यतीति वचनात् । तस्मादत्रावसरे इंद्राय स्वाहेति पायसेनैवाहुतिः
तत संस्रवभक्षांते मरुद्भ्यः देवताविशेषेभ्यः बलिं हरति बलिं ददाति बलिमित्येकवचनं जात्यपेक्षं
। प्राशनांतं रहणमिति तत्कालमेव बलिहरणमित्यर्थः । तदर्थं बलिप्रमाणं पक्षादिप्रकरणे भिहितं क
५र्न र्मेभ्यो होमो न क्रियते बलि[illegible]दीयत इत्याहास्य हुतंश्च दंसि इत्यहुतादः । तादृशाय मरुत इति मरुतेः । तत ५
विशेषमाह । आश्वत्थेषु पलाशेषु मरुतो अश्वत्थे तस्थु इति वचनात् । अवम्बद्धे संबंधिषु पत्रेषु
बलिदानं कर्तव्यं । मरुत अश्वत्थे तस्थु इति वचनात् । यत्र च येषामवस्थानं तत्रैव तेषां दानमुचि
तं भिति अभिप्रायः । मंत्रानाह । शुक्रज्योतिरिति प्रतिमंत्रं विमुखेन च मनसा नामान्येषामेतानीति
श्रुतेः । ननु नाम भिरेवान्यत्र बलिदानं दृष्टं कुतो त्र मंत्रै दीयत इत्याह । नामान्येषामेतानीति श्रु

तेः । एतेषां मरुतां एतानि सूक्तज्योतिः । अत एव यावतीषु कंडिकासु नामबुद्धिः तावतीभिरेव बलिदा
नं । तत्र शुक्रज्योतिरिति [illegible]षड्गु उग्रश्च भीमश्चेत्यादिना अध्येतम सिद्धेन विमुखेन च मनसा मनसैव
बलिमंत्रान् स्मरेत् । न मुखेनोच्चारयेत् । इंद्रं दैवीरिति जपति । इंद्रं दैवीरित्यमुं मंत्रं जपति । ततो ब्राह्मण दे ३
भोजनमित्युक्तार्थं इति सूत्रार्थः । अथ प्रयोगः । प्रथमप्रयोगे भाद्रपदपौर्णमास्यां देशकालादिकी
५ह र्तनांते इंद्रयज्ञकर्म करिष्य इति संकल्पः । ततो मातृपूजाभ्युदयिकं च कृत्वा वसथ्याग्नौ कर्म कु
र्यात् । ततो जातृप्तोपवेशनमारभ्य संस्रावप्राशनांते विशेषः । अपां दुग्धस्य च प्रणयनं । [illegible]प्रणय
७ पयः न पात्रमध्ये सेतुं कृत्वा मूलभागे जलं अन्यत्र क्षीरं मिश्रीय प्रणयनं कार्यं मूलभागे वा क्षीरमितरत्र
जलं । उपकल्पनायां नितांतं लपिष्टं ससारवद्धोपत्राणीति हरिहरः । यवपिष्टं लौकिकोदकं अपू
पसंयवनार्थं खर्परं च अपूपार्थमेकादश छन्नपत्राणीति युक्तमेव गंगाधरोल्लिलेखोपकल्प

नीयानि॥ ततः आज्यं निर्वाप्य हुत्वा चरुपात्रे॥ शालीन् क्षीरमासिच्य तंडुलानू प्रक्षिपेत्॥ प्रणीतोदकेन
पिष्टं सम्यक् बध्वा तेन चतुरो पूपान्निर्माय स्तरणपर्याप्तान्वा निर्माय खर्परे ध्यापयेदिति हरिहरः॥ लौ
किकोदकेनैव संयमनमिति गदाधरः॥ तत्रायं क्रमः॥ आदौ आज्याधिश्रयणं तदुत्तरतः चरुः तदुत्त
रतो पूपानिति॥ ततः पर्यग्निकरणादि प्रोक्षण्युत्पवनांतं॥ ततो पूपैर्यथोक्तं स्तरणं॥ प्रतिदिशं वैको
केनात ततउपयमनकुशादानाद्याज्यभागहोमांते आज्येन पंचाहुतीर्जुहोति॥ आसु च ब्रह्मणोन्वा

यनमम॥ इं द्राद

रंभः॥ इंद्राय स्वाहा॥ इदमिंद्राण्यै स्वाहा॥ इदमिंद्राण्यै॥ अजायैकपदे स्वाहा॥ इदमजायैकपदे॥ अहि
र्बुध्न्याय स्वाहा॥ इदमहिर्बुध्न्याय॥ इदमहये इति केचित्॥ प्रोष्ठपदाभ्यः स्वाहा॥ इदं प्रोष्ठपदाभ्यो न म
मेति॥ एवं पंचाज्याहुतीर्हुत्वा पायसमभिघार्य स्रुवेणादायेंद्राय स्वाहेति हुत्वा॥ इदमिंद्राय न मम॥ ता
ततः पायसेनैव स्विष्टकृद्धोमं विधाय तथैव महाव्याहृत्यादि प्राजापत्यांता नवाहुतीर्हुत्वा संस्रवं

प्राश्य दक्षिणां दद्यात्॥ ततोग्नेरुत्तरतः प्राक्संस्थानि उदक्संस्थानि सप्त सप्त वा पर्णानि निधाय
स्रुवेण पर्याप्तशेषमादाय शुक्रज्योतिरित्यादिभिर्नमस्कारांतैः षड्भिः ऽयन्यभीमश्चेत्यनेन सप्तमेन
नमोंतेन मनसैव स्मृतेन एकैकस्मिन् पत्रे॥ एकैकेन मंत्रेण बलिं हरति॥ तत्रेमे प्रयोगः॥ शुक्रज्योति
श्चेति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता उष्णिक् छंदः मरुद्भ्यो बलिदाने विनियोगः॥ शुक्रज्यो
तिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च शुक्रश्च ऋतपाश्चात्यंहाः॥ नमः॥ इदं शुक्रज्योति

सत्यज्योति षे

षे चित्रज्योतिषे ज्योतिष्मते शुक्राय ऋतपे अत्यंहसे च न मम॥ एवमेकैकं बलिं एकैकस्मिन्पत्रे दत्वा॥ पुनः
स्रुवेणादाय ईदृङ् चेति प्रजापतिर्ऋषिः साध्या वा मरुतो देवता गायत्री छंदः बलिदाने विनियोगः

सदृङ् च

॥ईदृङ् चान्यादृङ् च प्रतिसदृङ् च मितश्च संमितश्च सभराः नमः॥ इदमीदृशे सदृशे प्रतिसदृशे मि
ताय संमिताय सभरसे च न ममेति द्वितीयपत्रे द्वितीयं बलिं दत्वा पुनस्तथैवादाय ऋतश्चेति

प्रजापतिऋषिः साध्या वा मरुतो देवता उष्णिक् छंदः बलिदाने विनियोगः । ऋतश्च सत्यश्च ध्रुवश्च धरुण
श्च धर्त्ता च विधर्त्ता च विधारयः नमः । इदमृताय सत्याय ध्रुवाय धरुणाय धर्त्रे विधर्त्रे विधार[illegible]य च न मम या२
मा इति तृतीयमंत्रे दत्वा पुनस्तथैवावदाय ऋतजिच्चेति प्रजापतिऋषिः साध्या वा मरुतो देवता गाय
त्री छंदः बलिदाने विनियोगः । ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अंतिमित्रश्च दूरे अमित्र
श्च गणः नमः । इदमृतजिते सत्यजिते सेनजिते सुषेणाय अंतिमित्राय दूरे अमित्राय गणाय च न ममेति
चतुर्थपात्रे पुनस्तथैवावदाय ईदृक्षास इति प्रजापतिऋषिः साध्या मरुतो देवता गायत्री छंदः बलिदाने विनियोगः
। ईदृक्षास एतादृक्षेभ्यः सदृक्षेभ्यः प्रतिसदृक्षेभ्यो मितेभ्यः संमितेभ्यः सभरेभ्यो मरुद्भ्यश्च न ममेति पंचमे
पुत्रे पुनस्तथैव गृहीत्वा स्वतवांश्चेति प्रजापतिऋषिः साध्या मरुतो देवता उष्णिक् छंदः मरुद्भ्यो बलिदा
ने विनियोगः । स्वतवांश्च प्रघासी च सांतपनश्च गृहमेधी च क्रीडी च शाकी चोज्जेषी नमः । इदं स्वतवसे प्र

दक्षास । इदमी ७ एतादृक्षे भ्यः ७

घासिने सांतपनाय गृहमेधिने क्रीडिने शाकिने उज्जेषिणे च न ममेति षष्ठे पात्रे पुनस्तथैव उ
ग्रश्चेति प्रजापतिऋषिः साध्या वा मरुतो देवता गायत्री छंदः सहमरुद्भ्यो बलिदाने विनियोगः । उग्रश्च
धुनिश्च सासहिश्चाभियुग्वा च विक्षिपः स्वाहा नमः । इदमुग्राय भीमाय ध्वांताय धुनये सासहये अ
भियुग्वते विक्षिपाय च न ममेति सप्तमपात्रे बलिं दत्वा इंद्रं दैवीरिति प्रजापतिऋषिः साध्या वा म
रुतो देवता यजुः जपे विनियोगः । इंद्रं दैवीर्विशो मरुतोनुवर्त्मानो भवन्तु यथेंद्रं दैवीर्विशो मरुतोनुवर्त्मा
नो भवन्तु । एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु इति स्वरपूर्वकं जपः । मरुद्भ्यो
बलिं हरतीति विधेः सर्वत्र इदं मरुद्भ्य इति वाक्यागः । ततो ब्रह्मवनु । एवमिमं यजमानं दैवीश्च
विशो मानुषीश्च । ततो ब्राह्मणभोजनं इदं च सूतकादिना मुख्यकालातिक्रमे शाकूश्वा । आश्विन्याः
पौर्णमास्यां यथासंभवं कार्यमिति गंगाधरकारिकाकारादयः । इति इंद्रयज्ञः समाप्तः ॥

॥ अथाश्वयुजीकर्म तत्र पारस्करः आश्वयुज्यां पृषातकाः पायसमैन्द्रं श्रपयित्वा दधिमधुघृतमि
श्रं जुहोती अनं मे पूर्य पूर्णमे माव्यगात्स्वाहेति दधिमधुघृताभिश्रममात्या अवेक्षन्त आयात्विंद्र इत्य
नुवाकेन मातृभिर्वत्सान्त्संसृज्य तां रात्रिमाग्रहायणीं च ततो ब्राह्मणभोजनमिति॥ आश्वयुज्यां पृ
षातका भवंतीति शेषः॥ अश्वयुजीशब्देन च आश्विनी पौर्णमासी अभिधीयते पृषातका इति च कर्मना
म एवं च आश्विन्यां पौर्णमास्यां पृषातका इति संज्ञकं कर्म भवतीत्यर्थः॥ पायसमैन्द्रं श्रपयित्वा दधि
मधुघृतमिश्रं जुहोतीति इंद्रदेवत्यं पायसा संस्कृतं द्रव्यं श्रपणेन संसाध्य दधिमधुघृतमिश्रं कृत्वा व
क्ष्यमाणदेवताभ्यो जुहोति इंद्रायेंद्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे वेति॥ इंद्रायेत्या
दिभिः पंचभिर्मंत्रैः स्वाहाकारांते प्रतिमंत्रैः प्राग्वजुहोति॥ प्राशनांते दधि पृषातकमंजलिना जुहोत्यूनं
मे पूर्यतामिति॥ स्विष्टकृन्महाव्याहृति होमीयसंस्रवप्राशनांते दधिमिश्रितं आज्यं अंजलिना संयुक्ताभ्यां

प्रतिसृभ्यां जुहोति हुतं पूर्यतामिति मंत्रेण पृषातकशब्देन दधिमिश्रितमाज्यमेवोच्यते तथाचाभि
धानचिंतामणौ आज्ये तु दधिसंयुक्ते पृषदाज्यं पृषातकमिति॥ एवं च दधिप्रधानं पृषातकमित्यर्थः॥ अ
न्ये तु पृषदाज्यं संपाद्य पुनरपि दध्ना संयोज्य जुहोतीत्याहुः॥ अंजलिशब्देन च संयुतप्रसृती द्वयमेवो
च्यते॥ तथाच अमरसिंहे पाणिर्निकुब्जः प्रसृतिस्तौ युतावंजलिः पुमानिति॥ दधिमधुघृतमिश्रममा
त्या अवेक्षंत आयात्विंद्र इत्यनुवाकेन दधिमधुघृतमिश्रं पायसं अमात्याः यजमानगृहस्यापः हृद
रः इत्युपक्रम्य अमाशब्दो निघंटौ गृहनाममु पठितः॥ एवं च अमा गृहं तत्र भवाः अमात्याः इत्यमा
त्यशब्दस्य व्युत्पादनात् ते पश्यंति अपां त्विंद्र इत्यनुवाकेन आयात्विंद्रा इत्यध्येतृप्रसिद्धेनाष्ट
कं ठिकात्मकेन मातृभिः वत्सांत्संसृज्य तां रात्रिं वत्सपदसमभिव्याहारात् मातृभिः गोभिः वा
त्सान् संसृज्य संमेलयंति मातृरात्रिं अत्यंतसंयोगे द्वितीया स्मरणात् तस्यां समस्तरात्रावित्यर्थः

ततो ब्राह्मणभोजनं। ततः एकस्य ब्राह्मणस्य भोजनं कारयेदित्यर्थः। अथ प्रयोगः। आश्विन्यां पौर्णमास्यां
प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा आवसथ्याग्नेः पश्चात्पत्न्या सह उपविश्य देशकालादि
कं संकीर्त्य पृषातककर्माख्यं करिष्य इति संकल्पं कुर्यात्। ततः पद्धतिकारलिखितादेवताभिध्यानं करो
ति। तद्यथा अग्निस्विष्टकृतं पायसंशेषेण भूशादिदेवताज्येनाहं यक्ष्ये इति मनसा चिंतयेत्। ततो ब्रह्मो
पवेशनांतादि प्राशनांते विशेषः। प्रत्यनीते शाचमुदं चमासे तुं कृत्वा एकस्मिन्प्रदेशे जलं मपरस्मिन्प्रदेशे च द्रु
खं लिनिप पूर्ववत्स्मरणयनं कुर्यात्। उपदेशातिदेशयोरभावात् न सर्वमपि दुग्धे प्रक्षिप्य तत्र तंडुलावापं
कृत्वा आज्याधिश्रयणं कृत्वा पूर्ववद्दधिश्रयणं कुर्यात्। उपयमनकुशादानात्पूर्वं पायसं दधि मधु घृतानि प्र
क्षिपेत्। आज्यभागांते दधिमधुघृतमिश्रितेन पयसेन जुहोति इंद्राय स्वाहेति इदमिंद्राय न ममेति त्या
गः। पुनस्तेनैव इंद्राण्यै स्वाहा। इदमिंद्राण्यै न मम। अश्विभ्यां न मम। आश्वयुज्यै पौर्णमास्यै स्वाहा। इद

माश्वयुज्यै पौर्णमास्यै न मम। शरदे स्वाहा। इदं शरदे न मम। एवं हुत्वा त्यागं च कृत्वा तत एव पायसादवदाय
अग्नये स्विष्टकृते स्वाहेति सौविष्टकृतं हुत्वा महाव्याहृतिहोमादि दक्षिणादानांतं कुर्यात्। ततस्तस्मिन्नाज्ये
ज्ये दधि प्रक्षिप्य पृषदाज्यं कृत्वा ऊनं मे पूर्यतां पूर्णं मे मा व्यगात् स्वाहेति मंत्रेण जुहोति। इदमग्नये
न मम। इति त्यागः इति संप्रदायः। आज्यदन्यमत्तादेशो जुहोति पुनर्विधीयते मेत्रस्य देवता याश्च प्रजा
पतिरिति स्विष्टिरिति स्विष्टिरिति छंदो गद्रइत्यादीनां सप्तानां वामदेव प्रजापत्याः सरस्वती गर्ग
विश्वामित्रवशिष्ठा ऋषयः त्रिष्टुप्छंदः अष्टसस्य दृहती छंद इंद्रो देवता अवेक्षणे विनियोगः इति
स्मृत्वा आयातिंद्रो वस उपन इह स्तुतः सुधमाद स्तु सूरः वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्र
मभिभूति पुष्यात् आतइंद्रो दूराते दोनेः आसादभिष्टिकृदवसे यासदुग्रः अवाजिघ्नेभिनृपति
र्वज्रं बाहुः संगे समत्सु तुर्वणिः पृतन्यून् आनंदं इंद्रो हरिभिर्याह्यच्छार्वाचीनो वसे राधसे च।

तिष्ठाति वज्री मघवा विरप्शी मंयज्ञमनुभोवाजसातौ॥ त्रातारमिंद्रमवितारमिंद्रं२ हवे हवे सुहवं॥ शूर
रमिंद्रं ह्वयामि शक्रं पुरुहूतमिंद्रं२ स्वस्तिनो मघवा धात्विंद्रः॥ इंद्रः सुत्रामा स्ववां अवोभिः सुमृडीको
भवतु विश्ववेदाः बाधतां द्वेषो॥ अभयं कृणोतु वीर्यस्यपतयः स्याम॥ तस्य वयं२ सुमतौ यज्ञियस्या
पिभद्रे सौमनसे स्याम॥ सुंसत्रामा स्ववां२ अइंद्रोस्मे आराचिद्द्वेषः सनुतर्युयोतु॥ आमंद्रैरिंद्रहरिंद्र
हरिभिर्याहि मयूररोमभिः॥ मात्वाकेचिन्नियमन्विंपाशिनो ति धन्वेव ताँ इहि॥ एवेदिंद्रं वृषणं वज्र
बाहुं वसिष्ठासो अभ्यर्चंत्यर्कैः॥ स न स्तुतो वीरवद्धातु गोमत् यूयं पात स्वस्तिभिः सदा नः॥ इत्यन
वाके नदधिमधुघृताभिश्रहुतशेषं पायसं पश्यति तस्यां रात्रौ गोभिर्वत्सानेकीकृत्य स्थापयेत्।
ततो ब्राह्मणभोजनमिति॥ अथाग्रहायणीकर्म॥ तत्र पारस्करः॥ मार्गशीर्ष्यां पौर्णमास्यामाग्रहाय
णीकर्म स्थालीपाकं श्रपयित्वा श्रवणवदाज्याहुती हुत्वापरा जुहोति यां जनाः प्रतिनंदंति रात्रीं धेनु

मिवायतीं संवत्सरस्य या पत्नी सानो अस्तु सुमंगली स्वाहा संवत्सरस्य प्रतिमां या त्वा२ रात्रिमुपा
स्महे प्रजां सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा संवत्सराय परिवत्सरायेदुवत्सराय वत्सराय कृणोतु
बृहन्नमः॥ तेषां वयं२ सुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम स्वाहा॥ ग्रीष्मो हेमंत उत नो वसंतः शि
वा अभया शरतः॥ तेषामृतूनां शतशारदानां निवात एषामभये वसेम स्वाहेति स्थालीपाकस्य जुहो
ति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमंताय चेति प्राशनांते सक्तून्शेषः२ दशार्वत्युप्योपनि
ष्क्रम्य णभस्यामार्जनामार्जनं तत उत्सृष्टो बलिरित्याहेति॥ मार्गशीर्षी पौर्णमासी [illegible] तस्यां
आग्रहायणीसंज्ञकं कर्म कर्तव्यमिति शेषः॥ स्थालीपाकं श्रपयित्वा श्रवणावदाहुती हुत्वापरा जु
होति॥ स्थालीपाकं चरुं श्रपयित्वा श्रवणाकर्मवदा [illegible] आहुतिद्वयं हुत्वा अपराः चतस्र आहुतीः
यां जना इत्यादिभिः [illegible] र्जुहोति॥ स्थालीपाकस्य जुहोति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्ये

ति॰

हेमंताय चेति सोमायेत्यादिभिः स्वाहांतैर्मंत्रैः स्थालीपाकस्य च शेषं जुहोति प्राशनांतेऽस्थिव्रत् समहान्यादि
त्यादिहोमीय संस्रवप्राशनांते सक्तुशेषं शूर्पे स्तु[illegible]प्य इपनिष्क्रमणप्रभृति आमार्जनात् श्रवणाकर्मकु
र्यात्। मार्जनांते उत्सृष्टो बलिरित्याह। मार्जनस्यावसाने उत्सृष्टो बलिरिति ब्रूयात्॥ अथ प्रयोगः॥ त
त्र आग्रयण्यां पौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वाग्निमपरेण सपत्नी
क उपविश्य देशकालादिकं संकीर्त्य आग्रहायणीकर्माहं करिष्ये इति संकल्पं कुर्यात्। ततः अनेकपद्ध
तिकारल्लिखितान् देवताभिध्यानं कुर्यात्। तद्यथा प्रजापतिं इंद्रं अग्निं सोमं अन्वेतपदं[illegible]अन्वेतं वे

दस्यं रात्रिं संवत्सरं परिवत्सरं इद्वावत्सरं इद्वत्सरं श्री[illegible]हेमंतं वर्षाः शारदं च आज्येन सोमं मृगशीरसं

मार्गशीर्षी पौर्णमासी हेमंतं च स्थालीपाकेनाग्निं कायुं सूर्यं अग्नीवरुणो अग्निं वरुणं सवितारं विष्णुं
विश्वान्देवान्मरुतः स्व कर्विं वरुणं प्रजापतिं च आज्येन आग्ने पांडु पार्थिवानां सर्पाणामधि

संवत्सरस्य या पत्नी सा नो अस्तु सुमंगली स्वाहा। इदं रात्र्यै न मम। ५

पतिं अन्वेतवायवांतरिक्षाणां सर्पाणामधिपतिं अभिभूः सौर्यांदिव्यानां सर्पाणामधिपतिं च सक्तु
बलिभिः आस्मिन्ना यद्वायवाणि रूपेकमण्यादं यद्वयेद्इति चिंतयेत्। ततो आलो[illegible]पवेशनादि
प्राशनांतं कुर्यात्। तत्र विशेषः पात्रासादनान्ते शूर्पं उदपात्रं दर्वीं कंकतं तत्र यं अंजनं अनुलेपनं स

वै

जः उल्का उल्काधारस्य एता निरूपकल्पयेत्। एतेषां मध्ये सादनप्रोक्षणे इति तु काश्चित्। ततः आ
ज्यभागां[illegible]नंतरां अपश्वेतपदाजहीत्याहुतिद्वयं श्रवणाकर्मवद्धुत्वा यां जना इत्यस्य अथर्वण ऋ
षिः अनुष्टुप् छंदः रात्रिर्देवता होमे विनियोगः इति स्मृत्वा यां जनाः प्रतिनंदंति रात्रिं धेनुमिवायतीं।
संवत्सरस्य प्रतिमा या तां रात्रिमुपास्महे। प्रजां सुवीरां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहेति जुहो
ति इदं रात्र्यै न ममेति त्यागः। ततः संवत्सराय रेणुते बृहन्नमः ते पांवयत सुमतौ याज्ञियानां ज्यो
ग्जीजा अहतास्याम स्वाहेति जुहोति इदं संवत्सराय परिवत्सराय इदावत्सराय इद्वत्सराय वत्स
परिवत्सराय इदावत्सराय इद्वत्सराय वत्सराय २

रायणन मम मेति त्यागः॥ ततः ग्रीष्म इत्यस्य स्परास्त्वा ऋषिः त्रिष्टुप्छंदः ग्रीष्मादयो देवताः होमे विनियो
गः इति स्मृत्वा ग्रीष्मो हेमंत नो वसंतः शिवा वर्षा अभया शरन्नः तेषामृतूनां शतशारदानां निवात एषा
मभये वसेम स्वाहेति जुहोति इदं ग्रीष्माय हेमंताय वसंताय वर्षाभ्यः शरदे च न मम मेति त्यागः॥ एता
स्वेव आज्याहुतयः॥ ततः स्थालीपाकेन होमः॥ तद्यथा सोमाय स्वाहा इदं सोमाय न मम॥ मृगशिरसे स्वा
हा इदं मृगशिरसे न मम॥ मार्गशीर्ष्यै पौर्णमास्यै स्वाहा इदं मार्गशीर्ष्यै पौर्णमास्यै न मम हेमंताय
स्वाहा इदं हेमंताय न मम ततः स्वास्थालीपाकस्य उत्तरार्द्धाद्देवताय[illegible] अग्नये स्विष्टकृते स्वाहे
ति इदमग्नये स्विष्टकृते न ममेति त्यागः॥ ततो महाव्याहृति होमादि प्राशनान्तं कुर्यात्॥ ततः सर्व
शेषे सूर्ये पुष्पनिष्क्रमणप्रभृति मार्जनान्तं श्रवणाकर्मवत् कुर्यात्॥ ततः मार्जनान्ते उत्सृष्टो बलिरि
ति वदेत्॥ ततस्तां रात्रिं वत्सान् भिः सह मेलयन्त्॥ इत्याग्रहायणीकर्म॥ अथ स्वस्तरारोहणं

उत्त२ भी४ [illegible]

तत्र पारस्करः॥ पश्चादग्नेः स्वस्तरमास्तीर्याहतं च वासः आस्तुतास्तहतवाससः प्रत्यवरोहेति दक्षि
तः स्वामी जायां तत्र यथा कनिष्ठमुत्तरतः दक्षिणतो जघनान्यामुपवेश्योत्तरउत्तरउदपात्रं शमीशाखा
सीतालोष्टाश्मनो निधायाग्निमीक्षमाणो जपत्ययमग्निवीरतमोऽयं भगवत्तमः सहस्रसातमः
॥ सुवीर्योऽयं श्रेष्ठो दधातु नाविति यश्चादग्नेः॥ पंचमं जालं करोतीति देवीनाव मीति तिसृभिः स्वस्त
रमारोहंति ब्राह्मणा मंत्रयते जसन्नू प्रत्यवरोहामेति जनानुज्ञाताः प्रत्यवरोहंत्यायुः कीर्ति
र्यशो बलमन्नाद्यं प्रजामिति सुयेता जपति सुहेमंतः सुवसंतः सुग्रीष्मः प्रतीधीयतां तः॥ शिवा नो व
र्षाः संतु शरदः संतु नः शिवा इति स्योना पृथिवी नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशं
त्युपोत्थितं त्युदायुषा स्वायुषा स्वायुषो त्पर्जन्यस्य वृष्ट्या सप्तधामभिरिति एवं द्विः परं अनु
ज्ञाता अथ शायीरं चतुरो मासान् यथेष्टं वेति॥ अस्यार्थः॥ पश्च पश्चं अन्वयुज्यां पृषातकाशो

स्थपत्यामिंद्रयज्ञ इतिवत्तन्न किंचि[त्] विधायोक्तं तथापि स्त्रस्तरारोहणस्य पृथक् पाकयज्ञमध्ये गणनात् आ
ग्रहायणिकर्मांते पठितमपि कर्मांतरमेव स्त्रस्तरारोहणं तच्च आग्रहायणीकर्मांगक कर्म मध्ये पठितत्वा
त् तदनंतरे काल एव कर्तुं युज्यते अत एव गंगाधरः मार्गशीर्षपौर्णमास्या मूर्ध्वं अर्वाक् गच्छन्त्याः शुभ
वासरे एतस्य कर्तव्यत्वमाहा रेणुदीक्षितोप्यस्याग्नेः पश्चात् स्त्रस्तरं तृणैरास्तीर्य अहतं वासः
सह प्रक्षालितं नवं च वासः च कारादास्तीर्य उत्तरस्तरैर्वा सोग्रहणात् पूर्वं सूत्रस्थं स्त्रस्तरपदं कठादि
परं आप्लुताः कृतस्नानाः आहतवाससः सह प्रक्षालितनूतनवाससः संतः स्त्रस्तरं प्रत्यवरोह
ति निविशंते तत्प्रकारमाह दक्षिणतः स्वामी जायोत्तरा यथा कनिष्ठमुत्तरतः स्वामी गृहपतिः सर्वेषां
दक्षिणतो ब्राह्मणमुपवेश्य उत्तरत उदपात्रं शमीशाखां सीतालोष्टाश्मानो निधाय अग्निमीक्षमाणो जपत्य
यमग्निरिति गृहपतिः आदौ अग्नेर्दक्षिणत ब्राह्मणं उपवेश्य होमाभावा ब्राह्मणोपवेशनमशा

स्त्रमत्राभिधीयते उत्तरतः अग्नेरुत्तरतः उदपात्रं जलपूरितं विंद्भाजनं शमीशाखां सीतालोष्टं हलप
द्धतिभवं मृत्खंडं अश्मानं पाषाणं निधाय स्थापयित्वा अग्निं ईक्षमाणः अवलोकयन् अयमग्निरि
ति मंत्रं पठेत् पश्चादग्नेः प्रांचमंजलिं करोति दैवीं नावमिति तिसृभिः अग्नेः पश्चात् प्रांचं प्रागग्रं अंज
लिं करोति नमस्कारार्थं प्लातुवां जलिं निदधाति दैवीं नावमिति तिसृभिः ऋग्भिः स्त्रस्तरमारोह
ति ब्राह्मणमामंत्रयते ब्रह्मन्प्रत्यवरोहामेति पूर्वोक्तं स्त्रस्तरं आवेक्षन् ब्राह्मणं आमंत्रयते पृच्छति स्वा
मी ब्रह्मन्प्रत्यवरोहामेति [illegible]
[illegible] प्रत्यवरोहामेति बहुवचनं पत्न्याद्यपेक्षं पूर्वे ये आरोहणधर्मा उक्तास्तेषामयं कालः ब्राह्मणा
नुज्ञाताः प्रत्यवरोहंत्यायुः कीर्तिर्यशो बलमन्नाद्यं प्रजामिति प्रत्यवरोह ध्रुमितिथयो वितेवा
क्येन ब्राह्मणानुज्ञाताः दत्ताज्ञाः प्रत्यवरोहंति स्त्रस्तरं अधितिष्ठंति आयुः कीर्तिरिति मंत्रेण पुरु

षाणां च सर्वेषां मंत्रपाठः इति हरिहरः ॥ उपेता जपंति स्रुहेमंतइति ॥ उपेताः कृतोपनयनाः ये ते जपंति स्रुहेमंत इति मंत्रं ॥ अत्र उपेता इति विशेषोपादानात् ॥ अनुपनीतानां मंत्रजपाभावः ॥ पत्नीवर्जं सर्वस्त्रीणां च मंत्राभावः ॥ इति गर्गपद्धतौ ॥ स्योना पृथिवी नो भवेति दक्षिणैः पार्श्वैः आकुशिरसः संविशंति ॥ स्योना पृथिवीत्यनेन मंत्रेण दक्षिणा पार्श्वैः दक्षिण वक्षःस्थल प्रदेशैः ॥ पार्श्वे इति सप्तम्यंतपाठे ऽधि करणकं शयनं ॥ आकुशिरसः पूर्वस्यां दिशि शिरः कृत्वा शेरते स्वाम्यादयः ॥ उपरिष्टं त्वदा युषा स्वायुषेति ॥ उपस्त्रस्तर समीपे एव तिष्ठंति किंचित् शायितोत्तिष्ठंति एवं द्विः परं ब्राह्मणानुज्ञाताः एवमुक्तेन प्रकारेण वारद्वयं पुनः कुर्यात् किं प्रभृति ॥ ब्रह्मानुज्ञाताः ब्राह्मणेनानुज्ञाता प्रभृतीत्यर्थः ॥ अधः शायी रत्नस्तु चतुरो मासान् यथेष्टं वा अतऊर्ध्वं चतुरो मासान् पौषादिचैत्रांतान् अधः भूमौ शायी स्यात् सर्वे पि यथेष्टं वा यथारुचि वा मासमेकं स्यादिवा ॥ इति सूत्रार्थः ॥ अत्र गौणकालाभाव इति गंगाधरः ॥

॥ अथ प्रयोगः ॥ मार्गशीर्षपौर्णमास्या ऊर्ध्वं आगहायन्याः कस्मिंश्चित् शुभे दिने कृतनित्यक्रियः सपत्नीकः ॥ अद्येत्यादि देशकालादिकीर्तनांते स्वस्तरारोहणमहं करिष्ये इति संकल्प मातृपूजाभ्युदयिकं कुर्यात् ॥ एतच्च आवसथ्यं स्थंडिलांतरे नीत्वा पंचभूसंस्कारपूर्वकं तत्र स्थापयित्वा कार्यं औपवसथ्ये रात्रिमंतरेण अग्निशालायां शयननिषेधादिति हरिहरः ॥ अन्ये तु अग्नेः पश्चात् स्रस्तरशयनपर्याप्तस्थलाभावे एवान्यत्र गमनमाहुर्नान्यथा यथ्यशयननिषेधः सरागप्राप्तशयनस्य निषेधो न वैधस्येत्याहुः ॥ रेणुकारिकापि निवेशनमध्ये कुर्यात् शय्यास्य सत्यनुष्ठते ॥ स्त्रीति गृह्या सपत्नीकाः संति ये वृत्तिरूप्ता ॥ अवकाशे न चेदग्निं पश्चादारोहणाय वै अग्निदेशांतरं नीत्वा तत्पश्चात् स्रस्तरास्तृतिरिति ॥ ततोग्नेः पश्चात् कुशैः आस्तरं विधाय तदुपरि आहतं वासः स्तृणुयात् ॥ स्रस्तरारोहणं करिष्ये स भवत्वं ब्रह्मा भवेति कृत्वा अग्नेः दक्षिणतः उपवेश्य उत्तरतः उदपात्रं शमीशाखा

स्त्रीलालोष्टं अश्मानं च उदकुं संस्थाप्य निनिधाय स्वस्तरस्य पश्चादुपविश्य अग्निमीक्षमाणो जमा
नो जपति वक्ष्यमाणमंत्रं। अयमग्निर्वीरतम इत्यस्याः प्रजापतिऋषिः अ अग्निर्देवता अनुष्टुप्छं
दः जपे विनियोगः। अयमग्निर्वीरतमो वयं भगवत्तमः सहस्रसातमः। सुवीर्यो यं ५ श्रेष्ठे दधातु नौ इ
ति। ततोग्नेः पश्चात् प्रांचमंजलिं करोति दैवीं नावमिति सृभिः। दैवीं नावमित्यस्य प्रजापतिर्ऋषिः अ
ग्निर्देवता। सुनोवनो मित्रावरुणेत्यस्याः सरस्वती ऋषिः मित्रावरुणौ देवते तिसृणामपि गायत्री
छंदः अंजलिकरणे विनियोगः। दैवीं नावं ५ स्वरित्रामनागसमस्रवंतीमारुहेमा स्वस्तये। सुनाव
मारुहेयमस्रवंतीमनागसं। शतारित्रां ५ स्वस्तये। आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं। मध्वा
रजांसि सुक्रतू। इति। ततो ब्रह्मनुप्रस्यवशेहामेति। ब्राह्मणः मामंत्र्य प्रत्यवरोहध्वमिति ब्रह्म
णा दत्तानुज्ञाः सर्वे सुस्नाताः परिहिताहतवाससः प्रत्यवरोहंति। आयुः कीर्तिरित्यस्य गोतम ऋषिः

स्यासस्य धानुभिरि सप्तेन मंत्रेणा सर्वे क्रमादुत्तिष्ठेयुः। नं त्रं लानुमंत्रणादि उत्थापनांतं
द्विरपरः ८

आग्निर्देवता गायत्री छंदः स्वस्तरारोहणे विनियोगः। आयुः कीर्तिर्यशो बलमन्नाद्यं प्रजामिति न
तो स्वस्तरमारुह्य त्वक्तोपनीलाः स्तो जपंति। सुवसंतः सुग्रीष्मः प्रतिधीयतां नः। शिवा नो वर्षाः संतु
शरदः संतु नः। शिवा इति मंत्रं। ततस्ते सर्वे पि स्योना पृथिवी नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः स्वपंति
। स्योना पृथिवीत्यस्य दध्यङ् आथर्वण ऋषिः गायत्री छंदः पृथिवी देवता स्वापे विनियोगः। स्योना पृथि
वी नो भवानृक्षरा निवेशनी ततः। चिंत्र उदायुषेति मंत्रेणोत्तिष्ठंति। उदायुषेति गोतम ऋषिः अग्नि
र्देवता गायत्री छंदः उत्थाने विनियोगः। उदायुषोस्थायुषो त्पर्जन्यस्य वैमेव कुर्यात्। तत आरभ्य च
तुरो मासान्। अधःशायी रत्नयथेष्टं वा। अन्यत्रानीतं चेत् पंचभूसंस्कारपूर्वकं पुनः स्वस्थाने स्था
पयेत्। इदं च स्वस्तरारोहणं अस्तमयानंतरं कार्यमिति गर्गपद्धतौ। इति स्वस्तरारोहणं। इति श्रीय दे
जुराम्नायच एमिश्र श्रीकेशवसूनुश्रौतस्मार्तप्रचंडरश्मिमिश्रश्रीरत्नेश्वरतनूजनियाज्ञिकभूवंदा

रकं रुद्रं वंदनीय मिश्राद्वैश्वनाथ प्रकाशितेऽस्मै संस्कृता वैद्यनाथेन तृतीय मानन भूः अथाष्टकाकर्माण्युच्यंते।
तत्र पारस्करः ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टका ऐंद्री वैश्वदेवी प्राजापत्या पित्र्येति पूर्ण माऽऽ सद्गाकैर्यथा सं
ख्यं प्रथमाष्टका पक्षस्याष्टम्यां स्थालीपाकं श्रपयित्वाज्य भागाविष्ट्वाज्याहुती जुहोति त्रिंशत्स्वसार
उपयंति निष्कृतं समानं केतुं प्रतिमुंचमानाः। ऋतूंस्तन्वते कवयः प्रजानतीर्मध्ये छंदसः परियंति भा
स्वतीः स्वाहा। ज्योतिष्मती प्रतिमुंचते नभो रात्री देवी सूर्यस्य व्रतानि। विपश्यंति पशवो जायमाना ना
नारूपा मातुरस्या उपस्थे स्वाहा। एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिंद्रं तेन दस्यू
न्व्यसहंत देवा हंतासुराणामभवच्छचीभिः स्वाहा।। अनानुजामनुजां मामकर्त सत्यं वदंत्यन्विच्छ एतत्।
भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा। अभून्मम सुमतौ विश्ववेदा आ
ष्ट प्रतिष्ठामविदद्धि गाधं भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा। पंच

व्युष्टीरनु पंच दोहा गां पंचनाम्नीमृतवोनु पंच। पंच दिशः पंचदशेन क्लृप्ताः समानमूर्ध्नीरधि
लोकमेकं स्वाहा। ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति। सूर्यस्यैका चर
ति निष्कृतेषु धर्मस्यैका सवितैकां नियच्छतु स्वाहा। या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे। सा नः
पयस्वती धुक्ष्वोत्तरामुत्तरां समां स्वाहा। शुक्रऋषभा नभसा ज्योतिषागाद्विश्वरूपा शबली
रग्निकेतुः।। समानमर्थं स्वपस्यमाना बिभ्रती जरामजर उष आगात्स्वाहा।। ऋतूनां पत्नी
प्रथमेयमागादह्नां नेत्री जनित्री प्रजानां। एकासती बहुधोषो व्युच्छसाजीर्णा त्वं जरयासि स
र्वमन्यत्स्वाहेति स्थालीपाकस्य जुहोति शं ता पृथिवी शिवमंतरिक्षं शं नो द्यौरभयं कृणो
तु। शं नो दिशः प्रदिश आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा।। आपो मरीचीः परि
पांतु सर्वतो धाता समुद्रो अपहंतु पापं। भूतं भविष्यदकृंतद्विश्वमस्तु मे ब्रह्माभिगुप्तः सु

रक्षितः स्यात् स्वाहा। विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च संतु ऊर्जं प्रजाममृ
तं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहेति अष्टकायै स्वाहेतीति। अस्यार्थः। ऊर्ध्व
माग्रहायण्याः। मार्गशीर्षपौर्णमास्यनंतरं तिस्रः अष्टकाः अष्टकाख्यानि त्रीणि कर्माणि भवंति।

आसां चाभ्यासः स्मरणात्तु [illegible] हूतु क्रियेति क... विशेषस्तु पाकयज्ञसंस्थाविचारे पूर्वं अभिवि
हितः। तत्र देवता आह ऐंद्री वैश्वदेवी प्राजापत्या पित्र्येति। तत्र प्रथमा ऐंद्री इंद्रो देवता अस्या इत्यैंद्री
इंद्रदेवत्येत्यर्थः। तादृतां त निर्देशनात् इंद्राय स्वाहेति। तदीयद्रव्येण होमः कार्यः। एवं द्वितीया वैश्व
देवी। विश्वेदेवदेवत्या। तत्र विश्वेभ्यो देवेभ्यः स्वाहेति तदीयद्रव्यहोमः। तृतीया प्राजापत्या प्रजा
पतिदेवत्या। तत्र प्रजापतये स्वाहेति होमः। पित्र्येति चतुर्थी पितृदेवत्या तत्र पितृभ्यः स्वाहेति
होमः। मध्यावर्षे च तुरीया शाकाष्टकेति वक्ष्यति तत्र देवताकथनाभावात् इदं तत्रोत्कृष्यते स्वतंत्रो

हि मुनिः कस्याचित् प्रसंगेन किंचिद्वक्तीति देवता कथने प्रसंगेन अप्रतिज्ञाता या अपि चतुर्थ्या
अष्टकाया देवता कथमंगदोषाय। इदानीं द्रव्याण्याह। अपूपमांसशाकैर्यथासंख्यं। अपू
पाः पोलिकाः। केषांचिन्मंडकत्वेन प्रसिद्धाः। पूपोपूपः पोलिकास्तु पोलिका पूपिका इत्यभिधानचिं
तामणिः। अपूपमांसशाकैश्च मांसं चेति। यथासंख्यं यायस्य संख्यातामनतिक्रम्य प्रथमाष्टकायां प्र
थमं द्रव्यं अपूपः। द्वितीयाष्टकायां द्वितीयं मांसं तृतीयाष्टकानामनेकत्वाद ... ने का इ

ति संशय तदर्थमाह। प्रथमा आद्या अष्टका पक्षाष्टम्यां पक्षशब्देनात्र ऊर्ध्वमाग्रहायण्या इ
लुक्तत्वात् स एव पक्षो ग्रहीतव्यः। आग्रहायण्युर्ध्व पक्षस्याष्टम्यामित्यर्थः। स्मृतिश्च हेमंतशिशिरयोश्च
तुर्णामपरपक्षाणामष्टमीष्वष्टका इति। स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति
त्रिंशद्धात्रस्य सा रराः इत्यादि। स्थालीपाकस्य जुहोति शांता पृथिवीति स्थालीपाकस्य सवयवलक्ष

दान णो षष्ठीस्थालीपाकस्याचं[..]मादाय शंता पृथिवीत्यादिभिश्चतुर्भिर्मंत्रैर्जुहोति [..] आहुतीः॥ अ
त्रयस्यापूपहोमस्यावसरो नोक्तस्तथापि अपूपहोमेन भवितव्यं॥ अपूपमांस[शा]काकेरिति पूर्वोक्ति
खितसूत्रेण अष्टकायां अपूपस्य साधनत्वादैंद्री वैश्वदेवी यादिभादेवता याश्चाप्युक्तत्वात्॥ केवल
मवसरमपेक्षामहे॥ तत्र आज्यभागाविष्ट्वा ज्याहुतीर्जुहोतीत्यादिभिर्विशेषवचनैरुक्तानां होमा
नां मध्ये निवेशासंभवान्नदंते एव इंद्राय स्वाहेत्यपूपेनैकाहुतिर्देयेति एकं प्रत्यष्टके होम इति सूत्रा
र्थः॥ अथाष्टकाकर्मपद्धतिः॥ तत्र मार्गशीर्षा अनंतरं कृष्णायां अष्टमीतस्यां [..] मातृपूजा आ
भ्युदयिकं चेति हरिहरादयः॥ अपरे तु नाष्टकासु भवेच्छ्राद्धमिति वचनात् न श्राद्धमिच्छंति तदा
च मातृपूजामात्रं केचित्तु यत्रैवाभ्युदयिकं श्राद्धं तत्रैव मातृपूजनमित्याहुः॥ ततो देशकालादिकीर्त
नांते अष्टकाकर्माहं करिष्ये इति संकल्पः॥ केचिन्मातृपूजनात्पूर्वं संकल्पमिच्छंति॥ ततो वैकल्पिका

वधारणं॥ ततोनेकपद्धतिकारलिखनाद्देवताभिध्यानं॥ तत्र प्रजापतिमिंद्रमग्निं सोमं स्वस्त्रात्री अ
ष्टकारात्री अष्टकारात्री रात्रीः रात्रीः रात्रीः रात्रीः घृतेन पृथिवी अंतरिक्षं दिवं दिशः आदिशः अहोरात्रे
अपः मरीचीः धातारं समुद्रं ब्रह्माणं विश्वान् वसून्देवान् रुद्रान्देवान् रुद्रान् आदित्यान् गोपृन्
नृमरुतः प्रजापतिं परमेष्ठिनमष्टकाः एताः स्थालीपाकेन इंद्रं अपूपेन अग्निं स्विष्टकृतं स्थालीपा
कशेषेणाग्निं वायुसूर्यं अग्नो वरुणो अग्नीवरुणो अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान्मरु
तः स्वर्कान् वरुणं प्रजापतिं एता आज्येनाहं यक्ष्ये॥ ततो ब्रह्मोपवेशनाद्यावसथ्याग्नो विशेषः॥ तंडुलानं
तरं अवसथ्याग्निपक्वस्य सिद्धस्येवापूपस्यासादनं प्रोक्षणकाले प्रोक्षणं च केचित्तु नावसथ्याग्निपक्वस्यानि
यममाहुः॥ अपूपमात्रस्योपादानात्॥ ततः आज्यभागांतं हुत्वा ऋष्यादि स्मरेत् त्रिंशत्सारइत्यादिमंत्र
आतस्य याज्ञवल्क्य ऋषिः लिंगोक्तदेवता त्रिष्टुप् छंदः॥ अष्टम्या अनुष्टुप् छंदः होमे विनियोगः॥ त्रिंशत्स्व

सारउपयंति विष्ठुतिं ८ समानं योनिं प्रति मुंचमानाः ॥ ऋतूंस्त्वन्वेते कवयः प्रजानती मध्ये छंदसः परियंति भास्वती स्वा
हा इदं स्वसभ्यः ॥ ज्योतिष्मती प्रतिमुंचते नभो रात्री देवी सूर्यस्य व्रतानि ॥ विपश्यंति पशवो जायमाना नानारूपा
मातुरस्या उपस्थे स्वाहा ॥ इदं रात्र्ये नमम ॥ एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिंद्रं ॥ तेन दस्यून्व्य
सहंत देवा हंतासुराणामभवच्छचीभिः स्वाहा ॥ इदमष्टकायै नमम ॥ अनानुजामनुजां मामकर्त सत्यं वदंत्य
न्विच्छ एतत् ॥ भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्तः स्वाहा ॥ इदं सत्रीभ्यो नमम ॥ अभू
न्मम तो विश्वे वेदा श्राष्ठ प्रतिष्ठामविदद्धि गाधं भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा ॥
इदं रात्रीभ्यो नमम ॥ पंच व्युष्टीरनु पंच दोहा गां पंचनाम्नीमृतवोनु पंच दिशः पंचदशेन क्लृप्ताः समानमू
र्ध्नीरधि लोकमेकं ८ स्वाहा ॥ इदं रात्रीभ्यो नमम ॥ ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेकामहिमानं विभर्ति सूर्य
स्यैका चरति निष्कृतिषु धर्मस्यैका सवितैकां नियच्छंतु स्वाहा ॥ इदं रात्र्ये ॥ या प्रथमा व्यौच्छत्सा धेनुरभ

वद्यमे ॥ सा नः पयस्वती धुक्ष्वोत्तरामुत्तरां ८ स्वाहा ॥ इदं रात्र्यै नमम ॥ शुक्रऋषभा नभसा ज्योतिषागाद्वि
श्वरूपा शबली रग्निकेतुः ॥ समानमर्थं स्वपस्यमाना विभ्रती जरामजर उष आगात् स्वाहा ॥ इ
दं रात्र्यै नमम ॥ ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानां ॥ एका सती बहुधोषो व्यौच्छत्सा जी
र्णत्वं जरयसि सर्वमन्यत् स्वाहा ॥ इदं रात्र्यै नमम ॥ ततः स्थालीपाकमभिघार्य स्रुवेणादाय चतस्र
आहुतीर्जुहुयात् ॥ शांता पृथिवी शिवमंतरिक्षं ८ शं नो द्यौरभयं कृणोतु ॥ शं नो दिशः प्रदिश आदिशो नो
होरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा ॥ इदं पृथिव्या अंतरिक्षाय दिवे दिग्भ्यः प्रदिग्भ्यः [illegible] आदि

म.१

ग्भ्यः अहोरात्राभ्यां न मम ॥ इति ॥ आपो मरीचीः परिपांतु सर्वतो धाता समुद्रो अपहंतु पापं भूतं भविष्य
दकृतद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्यां ८ स्वाहा ॥ इदमद्भ्यो मरीचीभ्यो धात्रे समुद्राय ब्रह्मणे
नमम ॥ विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च संतु ॥ ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्म

थिपरमेष्ठीदधातुनः स्वाहा॥इदं विश्वेभ्यो आदित्येभ्यो वसुभ्यो रुद्रेभ्यो मरुद्भ्यः प्रजापतये परमे
ष्ठिने च न मम॥ततः अष्टकायै स्वाहा॥इदमष्टकायै न मम॥ततः आ यूयमभिधार्य किंचित्स्वि
ष्टकृदर्थं पात्रे अवशेषयन् ॥ स्रुवेणावदाय जुहुयात्॥अग्नये स्वाहा इदमग्नये न मम॥ततः स्थालीपा
कापूपशेषाभ्यां स्विष्टकृत्ततो व्याहृत्यादि हुत्वा शेषं समापयेदित्यष्टकाकर्मपद्धतिः॥ततः श्वोभू
तेन्वष्टकाकर्म॥तत्र पारस्करः॥श्वोन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिंडपितृ
यज्ञवत्॥ स्वः अष्टकाना मुत्तरेद्युः अन्वष्टकासु चतसृणामप्यष्टकानां अपरेद्युः कर्म भवति तत्र
पार्श्वसक्थिसव्याभ्यां पार्श्वं च सक्थि च पार्श्वसक्थिनी ते च सव्ये ताभ्यां पार्श्वसक्थिसव्याभ्यां परि
वृते सर्वतः आच्छादिते गृहे तत्र आर्यापरिमाणं चतुरस्रमुदक्प्रागारमिति कारिकाकारः॥तत्र पिंडपितृय
ज्ञवत्कर्म भवति अपराह्णे॥ पिंडपितृयज्ञ इत्यत्र यदुक्तं तद्भवतीत्यर्थः॥विशेषमाह॥स्त्रीभ्यश्चात्र

स्त्रीभ्यः मातृपितामहीभ्यो पि ददातीति चकारः पिंडपितृयज्ञवदित्यनेनात्रापि ते पितृपितामहप्रपितामहेः स
ह समुच्चयार्थः॥अत्र सामान्योपि स्त्रीशब्दः पित्रादिसान्निधानात् मात्रादि परो वसीयते॥ उपसेचनं च कर्षु
षु सुरयास्तर्पणेन चांजनानुलेपनं स्रजश्च केवलं ताभ्यः पिंडानेव दद्यादिति न किंतु उपसेचनं कर्षु सुर
या कुर्यात्॥ तर्पणेन च तर्पयत्यनेनेति तर्पणं सक्तवः तैः शर्करा पिच्छिकावा तत् उपसेचनं कुर्यात्॥अंजनं सौवीरांज
नं कज्जलं वा॥अनुलेपनं चंदनादि सुगंधद्रव्यं स्रजः पुष्पनिर्मिता मालाः चकारात् दद्यात्॥अत्र च स्त्री
पिंडसमीपे कृते षु गर्तेषु सुरया तर्पणेन चोपसेचनं॥अंजनादीनां तु स्त्रीपिंडेष्वेव दानमिति कर्केस्य पक्षं
॥आचार्यांतेवासिभ्यश्चानपत्येभ्य इच्छन्॥आचार्यः उपनयनपूर्वकं वेदाध्यायकः॥अंतेवासी
नैष्ठिको ब्रह्मचारी अनपत्याः ये पितृव्यादयः तेभ्यश्च यदि कामयेत तदा दद्यान्न नियमः॥हरिहरा
दयस्तु॥अनपत्येभ्य इति आचार्यांतेवासिविशेषणमेवमन्यंते इति सूत्रार्थः॥अथप्रयोगः॥

श्रे ७
प८

तत्रसर्वत्र आद्यादित्ते आवसथ्याग्नौ कर्म। नित्यवैश्वदेवांते अपराह्णे॥ संकल्पादि पूर्वोक्तं पिंडपितृ
यज्ञवत् कर्म कुर्यात्। विशेषस्तु आसादने उलूखलमुसलाभावः सूर्यस्य चंद्री हि स्थाने कीलयोर्ले
ख्यायोर्वा छागस्य पार्श्वसक्थ्योर्मांसं। सुरा अंजनं अनुलेपनं स्रजः सूत्रा लिका मांसं च। छित्वा सूक्ष्मा
णि कृत्वा तेषां ग्रहणादि कार्यमिति वासुदेवः कारिकायां पि ग्रहणमाद। अत्र वषं व्यासिना मांसं स्थल
क्ष्णं वन्हेस्तु पश्चिमे ऐतत्स्था ल्यां तुरू [illegible] यात्। स्वाचिकापुन [illegible] रेत्यसहतीह विदरस्तु मांसस्य ग्र
हणं ने छूति केवलं छित्वा स्थाल्यां प्रक्षिप्य पचेत्। इति [illegible] मेक्षणशशानांते हूले दक्षिणे छिमपरेण ना६
वास्तोरवाद्वय करणं। उभयत्रापुत्त्नुकनिधानमिति हरिहरेस्पष्टं वासुदेव्यां च। पित्रादिभ्यो वने जनं दत्वा
मुकगोत्रेसमातरमुकिदेवि अवने निक्ष्वेति द्वितीयरेखायामूले अवने ज्यतस्याएवमध्यान्तयोः
गोत्रादि पितामहि अवने निक्ष्वेति प्रपितामहि अवने निक्ष्वेत्यवने ज्य सकृदाच्छिन्ना [illegible] स्तरणादि अ

मुकगोत्र पितरमुकशर्मन्नेतत्ते मासं स्वधेति पित्रे दत्वा एवं पितामह प्रपितामहयोश्च दत्वा द्वितीयलेखा
यां अमुकि गोत्रे मातरमुकि देवी एतत्ते मासं स्वधेति मात्रे दत्वा एवं पितामहि प्रपितामह्योश्चावने ज्यन
स्थाने दत्वा इच्छया मात्रादि पिंडसमीपे अवने जनसकृदास्तरणपूर्वकं अनपत्येभ्य आचार्यांते वासि
भ्यः यथासंभवं मासंपिंडानूदद्यात्। चकाराद्न्येभ्योपि सपिंडादिभ्यो दद्यादिति हरिहरः। स्त्रीपिंडसं
निधाने ऽवटत्रयखननं। प्रादेशमात्रं रखातं चतुरंगुलं दीर्घता अंगुलं विपुलं ते ति गर्गः। स्त्रीपिंडसं
न्निधो पिंडसमं खात्वा वटत्रयं यथा पूर्वलतस्ता सांसुरा यै रभिलर्पणमिति रेणुः अमुकगोत्रे मुकिदे
वि सुरां वि वस्येति एकत्रावटे सुरां प्रसिच्य [illegible] तथैव पितामही प्रपितामह्योरपि इतरयोरवटयोरासि
च्यसक्तु भादाय अमुकगोत्रे मुकिदेवि तृप्यस्वेति मातृप्रभृतिभ्यो सक्तून् दत्वा तथैव [illegible] गोत्राद्यश्चा
यं अंजस्वेत्यंजनं दत्वा तथैवानुलिंपस्वेति अनुलेपनं दत्वास्त्रजो पिनह्यस्वेति स्त्रजो दत्वात्र पितरइति

जपाद्युत्सुक प्रक्षेपांतं कुर्यात् । ततोऽन्वष्टकाश्राद्धं कुर्यात् । इदं च मातरि विद्यमानायां न भवति
इति गंगाधरः कारिकाकारश्चैतुल्य । मातर्यविद्यमानायामन्वष्टक्यमिदं भवेदिति । अन्योपि वि
शेषस्तत्रैव केचिल्लोकभयादत्र [illegible] प्रत्यक्षां नाहरेत्सुरां । किंतु तत्सदृशं द्रव्यं गुडशा
र्यादिकं भवेदिति । अत एव गर्गः सुराद्रव्यस्यैवादनमाह काडहरीतकी गुडश्चेति । इत्यन्वष्टकां
॥ ॥ पौष पौर्णमास्यनंतरं भाविन्यामष्टम्यां द्वितीयाष्टका । तत्र पारस्करः । ऊर्ध्वमाग्रहाय
ण्यास्तिस्रोऽष्टका ऐंद्री वैश्वदेवी प्राजापत्या पित्र्येत्यपूपमांसशाकैर्यथासंख्यमिति पूर्वलिखि
तसूत्रे ऐंद्रवदेवतायाः सामान्यतो मांसरूपद्रव्यस्य चलात्तद्विशेषाकांक्षायां माह मध्यमा गवेति
। वैश्वदेवी मध्यमाष्टका गोमांसेन निवर्त्तनीयेत्यर्थः । एवं चात्राष्टकाश्राद्धे द्रव्यदेवतासंबंधानु
मितपशुहोमवाचकः । तत्र च दर्शपूर्णमासधर्मा उत पशुसामर्थ्यात् । तथा दर्विहोमाः पौर्णमास

म २

२९

धर्मानुक्तेत्यविशेषाज्जुहूदर्शनाच्च तूष्णीमनर्थस्तु ता इत्यादि । तथा अग्नीषोमीयात्पशुविल्याद्विन्या
यमूलककात्यायनसूत्रैः प्रापितानां दर्शपूर्णमासधर्माणां अग्नीषोमीयधर्माणां च एष एव विधिर्यत्र
क्वचिद्धोम इति सूत्रेण शब्दत एव एतत्सूत्रस्थैवकारकस्य प्रकांशांतरयोजनापक्षेपि प्राप्तानां प्रण
यनादीनां प्रणीयेत्यादिना पुनर्विधानादर्थतो निराकरणात् पशुश्चेदाम्नायेत्यादि पारस्करसूत्रैः
केषांचिद्धर्माणां प्रतिप्रसवाच्च कुशकंडिकोक्तसर्वहोमसाधारणधर्मैः पशुश्चेदाम्नायेत्यादिनाप्र
तिप्रसूतधर्मैश्चायं पशुकर्मतन्त्र्य इत्यवगम्यते प्रतिप्रसूतानां धर्माः परिव्यपणादयः । तथा च पारस्कर
सूत्रं पशुश्चेदाम्नाव्यागामग्रेणाग्नीन्परीत्य पलाशशाखया निरूढ्य परिव्ययनोपाकरणनियोजनप्रोक्षणा
न्यावृता कुर्याद् ध्रुवाज्यस्परिपशव्ये हुत्वा तूष्णीमपराः पंच वपोद्धरणं याभिधारये देवतां त्वा दिशेदुपाकर
णनियोजनप्रोक्षणेषु स्थालीपाके चैवं यां ८ हुत्वा वदानान्यवद्यति सर्वाणि पंचकास्थालीपाकमिन्द्रा ण्य

स्रुदानानि जुहोति पश्चं गं दक्षिणेति। अस्यार्थः। पशुश्चेदालभ्या आग्नमग्नेर्णा [illegible] न्यरीसपलाशशा
खं निहंति वेत् यदास्माजैः पशुः क्रियते तदा तं पशुं आलभ्य आग्नांगो पशुं वर्जयित्वा गोपशौ आलभ्य
वनाभावः। अग्रेण पुरस्तात् अग्नीन् परीत्य प्रादक्षिण्येन गत्वा पलाशशाखां निहंति निखनति गर्ते
आरोपयति। यूपकार्यस्वा शाखायाः इदं निखननं आज्यासादनोत्तरकाले कार्यं श्रौतेतस्मिन्नेव का
ले दृष्टत्वात्। अत्राग्नीनिति बहुवचनं सूत्रगवपक्षाभिप्रायेण परिव्ययणं यथाश्रौते उक्तं। त्रिगुणरशना
त्रिव्यामा कौशीरशना तया अभिमात्रे त्रिरन्तं परिव्ययतीति। उपाकरणं तदपि तत्रैवोक्तं। उपावीर
सीति तृणमादाय तेन पशुमुपस्पृशति यदेवानि तिऽनेन पशोरूपं स्पर्शनं नियोजनं तदपि तत्रैव
यादृशं द्विगुणरशनया द्विव्यामया कौश्यापाशं कृत्वा तं रशनं गमभिदक्षिणं बध्नातीति पशोः शृ
ंखयां बंधनं। प्रेक्षणं प्रोक्षणीभिरद्भिः पशोराशेचनं। तानि परिव्ययणोपाकरणनियोजनप्रोक्षणा

१०

नि आवृता मंत्ररहितक्रियामात्रेण कुर्यात् न केवलमेतान्येव। किंतु अन्यदपि यत् पशुसंस्कारकं पशु
समंजनपर्यग्निकरणश्राणशोधनादिकं तदपि तथैव मंत्ररहितं कुर्यात्। परिपशव्ये हुत्वा सूत्रीमपराः पं
च। पशव्ये संज्ञपनं परि उभयतः संज्ञपनात् पूर्व पश्चाच्च हूयते ते परिपशव्ये स्वाहा देवेभ्यो देवेभ्यः स्वा
हेत्याहुती हुत्वात् त्सीं मंत्रवर्जमपराः अन्याः पंच आज्याहुतीर्जुहोति। वपोद्धरणं आभिघारयेत्। पशो
र्वपाया उद्धरणं यथोक्तं कृत्वा निष्कामशनं उक्तप्रकारेण कृत्वा तां वपां अभिघारयेत्। आज्यात्। अर्थात्।
घृतेन। देवतां त्वादिशेदुपाकरणनियोजनप्रोक्षणेषु पूर्वोक्तेषु उपकरणनियोजनप्रोक्षणेषु देवतायाः
यस्यै देवतायै पशुः आलब्धो भवति तां देवतां आदिशेत्। उच्चरेत्। अमुष्मै त्वा उपाकरोति। अमुष्मै
त्वा नियुनज्मि। अमुष्मै त्वा जुष्टं प्रोक्षामि इत्येवं स्थालीपाके चैवमिति। स्थालीपाके तद्देवत्यं चरोश्च
एवं देवतामादिशेत्। एवमिति यथा उपाकरणादिषु। तत्र चरोरुपाकरणनियोजनाभावात् प्रोक्षणमा

अंगस्य ते। अमुष्मै त्वा जुष्टं प्रोक्षामीति तद्देवत्यं तंडुलप्रोक्षणं कर्तव्यमित्यर्थः। वपां हुत्वा अवदानान्यवद्य-
ति। छिन्नालि। कियंसं सर्वाणि हृदयं जिह्वा क्रोडं सव्यं सक्थि पूर्वेनडकं गुदतृतीयानि षट् सव्यास्त्रो
णि त्रितिसो विकृतानि यत्र द्वादश हृदयादीनि त्रीणि अथवा पंच अवद्यति। अत्र त्रीणि यंचकायपदावद्यति तदा
अवशिष्टेभ्यः स्विष्टकृत्। यदा च एकादशावद्यति तदान्येभ्यः त्रिभ्यः स्विष्टकृत्। वपां हुत्वा अवदानान्यव
द्यतीति वदता पशुपशोरङ्गानि रस्ताः स्थालीपाकमिश्राण्यवदानानि जुहोति स्य शृंगपश्वंगं दक्षिणा प
शोर्यद्रव्यं तद्देवदक्षिणा इति त्रार्थः। अत्र पशोरितिकर्तव्यतायाः श्रौतसूत्रसाध्यत्वेनान्यपि व्याख्यायंते॥
।बर्हिषि प्लक्षशाखास्तरणाति प्लक्षशाखानां पशुसंस्कारकत्वाद् आप्यास्तरणं कार्यं पलाशशाखां
निहंतीति विशेषवचनादिदेति। शाखाया उपकरणकारत्वात् परिन्ययणं कार्यं तत्र त्रिगुणेत्यादि
पूर्वोक्तं शकलस्याभावादेवावगूहनाभावः। अन्ये शाखायादीर्घार्थं येन केनचित् शकलेनाप्युप

ति २ म २ ध्यं ९ सू

दनं कार्यमित्याहुः। परिन्ययणवत् उपाचीरसीति तृणमादाय तेन पशुमुपस्पर्शयत् उपदे वानित्तिदेव
तां तादिशेदुपाकरणं नियोजनप्रोक्षणे स्थिति सूत्राद् देवतादेशमात्र पूर्वकमुपाकरणं भवति। अ
तएव कारिकारः तूष्णीं तृणमुपादाय पशुं तेन स्पृशेदिदमुपाकरोमीत्यंते तस्या पूर्वं बद्ध्देवतापदं अग्रेणै
पासनांतं तु प्रत्यङ्मुखं स्थितं शिरोदेशे स्पृष्टोदेत् उपाकरणमुच्यते इत्यादि। नियोजनमप्या
ह। कात्यायनः द्विगुणरशनया द्विव्याममया कौश्या पाशं कृत्वांतरा शृंगमभिदक्षिणं अर्धात् तस्य
त्वेति देवस्य त्वेति यूपदत्ति। द्विगुणरशनया गुणद्वयनिर्मितया रशनया द्विव्याममया व्यामद्व
यपरिमितया कौश्या कुशमया पाशं कृत्वा हरिस्वामिलिखनात् नागपाशं कृत्वेत्यर्थः। अंतरा
शृंगं शृंगयोरंतराले। अभिदक्षिणं [illegible] दक्षिणं अभिदक्षिणशृंगस्याभिमुखमित्यर्थः।
बध्नाति प्रतिमुंचति। पाशं कृत्वा प्रतिमुंचन्। प्रतस्य त्वादेव हविः पाशेन प्रतिमुंचामीति क्रते। तत्र

पत्नुं ८

मंत्रः। ऋतस्य त्वेति। देवस्य त्वेति यूपो देवस्य त्वा सवितुरिति मंत्रेण यूपे बध्नातीत्यनुवर्त्तते। तथा च देव
स्य त्वेति मंत्रेण तस्य यूपे बंधनं करोति इत्यर्थः। अथ बध्नातीत्यस्य प्रति मुंचतीत्यर्थं पूर्वसूत्र इति। न
बध्नाति इत्यनुवृत्त्यात्र बंधनलाभ इति चेत् न बध्नातीत्यस्य बंधनमेवार्थः। बंधनं च क्वाचित्याश प्रति
मोकः क्वचिदन्यादिति तदनुवृत्त्या बंधनरूपार्थलाभे विरोधाभावात्। एवं अनियोजनं शाखाधा उक्त
रतो भवति। उत्तरतो उपचारो यज्ञ इति कात्यायनसूत्रा[त्] दक्षिणे दृशी रसिया शेना ग्रस्ता या प्रति
मुच्य धर्मा मानुषपद्धति। उत्तरतो यूपस्य नियुनक्ति इत्यापस्तंबसूत्राच्चात्र देवस्य त्वेति मंत्रस्त
उक्तसूत्रेण निवर्त्तते। देवतां त्वादिश्यादिति सूत्राच्च देवतादेशपूर्वकं नियोजनं भवतीति। प्रोक्षणं तु
व्याख्यातमेव एतच्च प्रोक्षणं ब्राह्मणो मुञ्जां गृहीत्वा कर्त्तव्यं। अग्नीषोमीय पश्वोत्तर्येव दृष्टत्वात्। अनु
ज्ञाय संकेतादिनैव यात्सा ब्रह्मन् दविः प्रोक्षिष्यामीत्यादीनां मंत्रत्वेन पूर्वलिखितसूत्रेनैव निवर्त्ति

तत्वात्। अत्रापि पूर्वलिखित सूत्रात् देवतादेशो भवत्येवाय यत्रान्यत् यत्रान्यत् तदपि मंत्रर
हितक्रियया निवर्त्तनीयामित्यर्थः। किमन्यदितिचेत्। पशुसंस्कारकं कथमेवमिति चेत्। प्रोक्षणा
दिसमभिव्याहारात्। सूत्रांतरेषु पि पशुसंस्कारकानामेव पदार्थानां दर्शनात्। तथा च गोभिलग
ह्यं यवमतीभिरद्भिः प्रोक्षेदस्य कार्ये त्वा जुष्टं प्रोक्षामीत्युल्मुके न परिहरेत्। परि वाजपति कविरित्य
यः पानाय दद्यात्पीतशेषमभस्तात् सशरीरेवसिंचे दात्तं देवेभ्यो हविरित्यथैनां सुदयु स्व प्यसंज्ञपयं
ति प्राक्शिरस मुदक्पदीदेवत्ये दक्षिणाशिरसं प्रत्यक्पदी पित्र्य दैवत्ये संज्ञप्तायां जुहुयात् यत्पशुर्मायु
मकृतेति। पत्नी चोदकमादाय पशोः सर्वाणि स्रोतांसि प्रक्षालयेदग्रेणा नाभिं पवित्रे अंतर्द्धाया
नुलोममाकृत्य वपामुद्धरंति। ता प्रशाखा विशाखयोः काष्ठयोरवसज्याभ्युक्ष्य श्रपयेत्। अभ्यु
त्तिताया विशास्येति ब्रूयाद्यथा न प्राग्नेर्भूमिं शोणितं गच्छेत्। मृतामभिघार्योदगुद्वास्य प्र

त्यभिघारयेत्स्थालीपाकवन्नात्यदिति। एवं च पशुसंस्कारकाणि आस्योपग्रहणादीनि सर्वाण्यपि भ
वंति। तत्रास्योपग्रहणं अधस्तादुपोक्षणं च कात्यायनेनोक्तं। अपांपेरुरसीत्यास्यउपगृह्णाति यायोदेवीरि
त्यधस्तादुपोक्षतीति। अपांपेरुरिति मंत्रेण प्रोक्षणीः पशोः आस्ये मुखे उपगृह्णाति। उपसमीपे स्था
पयतीत्यर्थः। एतच्च स्थापनं पानार्थं। अथोपगृह्य त्यमां पेरुसीति प्रकृत्यैवतदनमंतर लोमेध्यं क
रोतीति श्रुतेः। अथोपगृह्णात्यग्निः पशुवासीदिति प्ररुस्य तर्पयित्वा स्वं पुनः संस्कृतस्य प्राणी
रितरान्यश्च प्रोक्षतीत्यग्निमेध प्रकारणीयश्रुतेश्च। अतएवगोभिलेन तु पयःपानापादयादित्युक्तं।
आयोदेवीरित्यधस्तादुपोक्षति आपोदेवीरिति मंत्रेण पशोः अधस्तादु[illegible] हृदयादिप्रदेशेउपोक्ष
तिप्रोक्षति। श्रुतिरपि अथाधस्तादुपोक्षत्यापोदेवीरिति इति। ततउपयमनकुशदानादि पूर्व
कं उत्तराधारमार्यपशोः संमंजनं कार्यं तदुक्तं पशोः कात्यायने नेउत्तराधारं कृत्वा पशुं पूर्ववत्सम

पु०

नक्ति। ध्रुवासमंजनात्पूर्वं पशुं[illegible]तरतिप्रतिमंत्रं समनक्ति ललाटांशश्रोणिषु ललाटे भाले। अंसयोः
स्कंधयोः श्रोण्योः कट्योः। तथा च श्रुतिः। स ललाटे समनक्ति संते प्राणो वातेनागच्छतामिति समंगा
नि यजत्रैरिति सयोः संयज्ञपतिराशिषेति श्रोण्योरिति। ततः असिमादाय स्रुवाग्निं आत्कालेन प
शोर्ललाटेउपस्पृशति। तदुक्तं तेनैव। दशेष्वा प्रयाजानाहृशासमाहरेति स्त्रुकमादाय भोजुह्वयेता
भ्यां पशोर्ललाटमुपस्पृशति। बोधेलेनाप्युक्तं वितिदशप्रायाजानिष्ट्वाशासमाहरेति ब्रूयात्। आ
नीतिचशासेशासं स्रुवकं चादाय जुह्वाग्ने आत्कालाभ्यां शासस्य स्रुवायां पशोर्ललाटउपस्पृशतिल
वमंत्रः घृतेनाक्तौवितिआत्रचस्परोरभावात् शासमेवस्रुवाग्ने आत्काले नैव पशोर्ललाटोप
स्पर्शनं कार्यमिति संप्रदायः। शासस्य रूपाभ्यामुपस्पर्शनस्य पशुसंस्कारकत्वे तस्मिसंस्का
रानुरोधेन सोमिकत्वाभ्यामुपस्पर्शातीत्यन्ये। असिस्रुवाभ्यामुपस्पृशतीति कात्यायनोक्ते [illegible]र

॥मिश्र॥
॥३५॥

॥सं स्क्र॥

शमीयं। ततः पर्यग्निकरणं। तत्प्रकारस्तु तेनैवोक्तः। आहवनीयोल्मुकमादायाग्नीध्रः समन्तं पर्येति प
श्वाज्यशामित्रदेशयूपचात्वालाहवनीयानाज्यपशुशामित्रान्वेति। आहवनीयोल्मुकं आदाय आग्नी
ध्रः त्रिः परिसर्वतः प्रदक्षिणं पश्वाज्यशामित्रदेशयूपचात्वालाहवनीयान् पर्येति। अथवा आज्यं पशु
शामित्रान् पूर्ववदेव पर्येति। अत्र यच्छामित्रदेशचात्वालाहवनीयादीनामभावात् शाखाग्न्यध्वर्युपा
हवनीयस्थानीयत्वात्। आवसथ्याग्न्युल्मुकं गृहीत्वा स्वयमेव पश्वाज्यशाखाग्नीनां सर्वतः वारत्रयं
पर्येति अथवा आज्यपश्वोः सर्वतः वारत्रयं पर्येति। ततः तदुल्मुके अग्नौ प्रक्षिप्य पश्वाज्यशाखाग्नी
नां आज्यपश्वोर्वा सर्वतः। अप्रादक्षिण्येन वारत्रयं प्रतिपर्येति तथा चोक्तं तत्रैव प्रतिप्रस्थोल्मुकं ता
वत्प्रतिपर्येतीति। ततः पशुं कंटे बध्वा शामित्रात् उदीच्यां दिशि संज्ञपनयार्थं नयति। तथा चाग्नीध्रो मीये

२८हीन कर्कादिभिर्लेखकातिः। शामित्रेनं कंटे बध्वा नयतीति। तं नीयमानं पशुं वपाश्रपणीभ्यां अन्वारभेते। तदु

दङ्मति क्तं तत्र कात्यायनेन। पुनरादायोदङ्मुखं वेति पद्धते पशुश्चान्वकु प्रतिप्रस्थाता न्वारभते एनं वपाश्रपणी
भ्यां कार्ष्मर्यमयीभ्यां विशाखाविशाखाभ्यामिति। अग्नीध्रः शामित्रार्थं पुनः आहवनीयादुल्मुकमा
दायोदङ् गच्छतीति पद्धते उदङ्मुखं गच्छति पशुश्चान्वकु पशुः तं आग्नीध्रः अन्वकु अध्वर्युपश्चाद्गच्छतीत्य
न्वकु। आग्नीध्रस्य पृष्ठतो गच्छतीत्यर्थः। प्रतिप्रस्थातान्वारभते। प्रतिप्रस्थातान्वालिङ्गविशेषः। स
एनं पशुं आन्वारभते स्पृशति वपाश्रपणीभ्यां वपाश्रप्यते आभ्यामिति वपाश्रपण्यौ ताभ्यां कार्ष्म

श्रा र्यमयीभ्यां श्रीपर्णी वृक्षावयवभूताभ्यां द्विशाखा विशाखाभ्यां द्विशृंगैकशृंगाभ्यामिति कर्कः। द्वि
मूलैकमूलाभ्यामित्यपरस्तेवः अन्तश्चाद्विमूलामेवाकारविशाखा अन्ती शाखा अविशाखा ताभ्यामि
त्यर्थः। तत्परिमाणं यज्ञपार्श्व उक्तं स्फ्यश्रूपौ पवेषे धानपि प्राणयनीयावधि वपाश्रपण्यौ कुर्याद
रत्निमात्राणीति। अत्र चएकाग्नेः इति कात्यायनसूत्रेण शामित्रादेर्निशकरणात् अत्र लिंगं तस्य यामा

वात्। अन्वारंभस्य च पशुसंस्कारकत्वात्। तदुल्मुकमनुपादायैव नीयमानं पशुं स्वयमेव च पाश्वपाणी

भ्यामारंभते इति तृणद्वयमादाय पशुशिरसि ॥ उल्मुकं च धृत्वा वा पलाशशाखया तु उल्मुकं रश

नया वामकरेण धृत्वा दक्षिणेन च पाश्वपाणिभ्याम न्वारब्धं पशुमुदञ्चयतां इति तु हविष्कृतः ततः तृणद्वया

दानं कृत्वा तयोः तृणयोर्मध्ये एकं तृणं पशुसंज्ञं पनदेशे उदगग्रं प्रागग्रं वा प्रक्षिपति तदुक्तं तत्रैव

। वेदितृणे। धर्मपुरोदायेति। तथा पश्चात्तृणमुपास्यति वर्षो वर्षीयसीति ततः तस्मिन् तृणे शामि

तामुखसंग्रहणेन रज्वादिना नाकृट वेष्टनेन वायथा शब्दं न कृणोति तथा योक्तं तत्रैव तस्मिन्नेनं

निघ्नंति अपक शिरसमुदक्पादं प्राक्शिरसं वा संगृह्य मुखं तमयं त्यथा श्याघानं वे ष्टेणवेति।

। वेष्ठ ग्रत्ल वेष्टक ॥ पारस्कर ॥ परिपशव्ये हुत्वा तूष्णीमपरा पंच जुहोतीति ॥ शेषः ॥

परिपशव्येइत्याहुत्योः संज्ञा ते वा एते परिपशव्ये इ

(page number in margin: ३५)

त्याहुत्योः संज्ञा ते वा एते परिपशव्ये इत्याहुती त्याहिध्मालेः ॥ एवं च परिपशव्ये इति संज्ञक आहुती

हुत्वा तूष्णीमपराः पंचाहुतीर्जुहोतीत्यर्थः ॥ तद्धोमप्रकारस्तु कात्यायनेनोक्तः ॥ स्वाहा देवेभ्यः इति

जुहोति। स्वाहा देवेभ्य इमंत्रेणैकामाहुतीं जुहोतीत्यर्थः ॥ एवं विधं आहुतीनां च पूर्णाहुती तिविका

रत्वं तथा च क्रतुसंख्यापरिशिष्टे कर्मणां प्रकृति मनुक्रमि मनुक्रमि

तथा च क्रतुसंख्यापरिशिष्टे कर्मणां प्रकृति मनुक्रमि मनुक्रमि

ष्यामो याता प्रकृतयः पूर्णाहुतिरालीनामिति। एवं च पूर्णाहुतिधर्माः सर्वत्र एवं विधि आस्वाहुतिषु भ

वंति। तेधर्माः कात्यायनेनोक्ताः ॥ तद्यथा निरूप्याज्यं गार्हपत्ये धिश्रित्य स्रुक्स्रुवं च संमृज्योद्वा

स्योत्पूयावेक्ष्य गृह्णीयात् अन्वारब्ध एवं सर्वत्रेति। अस्यार्थः ॥ निरूप्याज्यं पात्रांतरादाज्यस्थाल्यां

प्रक्षिप्य। गार्हपत्य संज्ञकस्याग्नेरुपरितामाज्यस्थालीं निधाय स्रुक्स्रुवं च संमृज्य स्रु

च संमार्ष्टि इति श्रुतेः प्रथमतः स्रुवस्य संमार्गः। अनंतरं स्रुचः। सूत्रे त्वस्यो[illegible] तत्स्रुवपूर्वं नि धरत्वात्
र्देशः। प्रतिप्रधानमंगावृत्तिरिति न्यायात् अभेदेन संमार्गः। स च द्रव्यांतरस्यानुपदेशात् स्रुवस्य चैकपा
णिनेति विशेषविधानाच्च दर्भैरेव कार्यः। उद्वास्य गार्हपत्यादाज्यस्थालीं गृहीत्वा उत्तरतः स्वरा
द्दक्षिणभूमौ निधाय उत्पूय साग्राभ्यां दर्भाभ्यां आज्यस्थालीस्थमाज्यमुत्पवनं कृत्वा अवेक्ष्य त
स्याज्यस्यावेक्षणं कृत्वा आज्यस्थाल्याः काशात्स्रुवेण गृहीत्वा। आन्वारब्धे यजमाने न कृतेस
स्य एवं सर्वत्रेति। यत्र यत्र आज्येनाजुहोतीति नोदनाय यथा पूर्णाहुतिं जुहोतीत्यादि तत्र सर्वत्र एवं।

मिस७

अधिश्रयणादिकं कर्तव्यं। यः इति पूर्णाहुतीधर्माः परिपश्व्याहुतौ भवंतीत्यवगम्यते इति। प्रकृतौ
च स्रुचः अभावात् स्रुवस्य च संस्कृतत्वादेवं उक्तरीत्या आज्यमात्रमावसथ्ये संस्कृत्य स्रुवेणैव
च समिदाधानपूर्वकं होमः कार्यः। समिदाधानपूर्वकत्वं चोक्तं पूर्णाहुतीप्रकृतिभूतप्रायश्चित्ताहुति

ष्वस्या गार्हपत्ये आज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतमाज्यं गृहीत्वा समिधमुपसंगृह्य
[illegible]त्य आहवनीये समिधमभ्याधाय दक्षिणं जान्वाच्य जुहोतीति। यत्र पश्वाहुतिसंपत्तिः
स्तत्र समित्संपत्तिदर्शनादव्ययमर्थो वसीयते यथा पंचाग्निविद्यापां तस्यादित्य एव समित्तूग
स्य संत्सर एव सामित्तूलस्पृथे व्येव समिदित्येवमादि। अपरे तु एष एव विधिर्यत्र कश्चिद्धोमः इत्या
दि सूत्रे दर्शपूर्णमासादिधर्माणामिव पूर्णाहुतिधर्माणामपि निराकरणात् कुशकंडिकोक्तेति कर्त
व्यतया च संस्कृतस्याज्यस्य विद्यमानत्वात् न परिपश्वाहुतौ अर्थं पुनः पूर्णाहुतिवदाज्यसंस्का
रः किंतु पूर्वसंस्कृतेनैवाज्येन तद्धोमः इत्याहुः द्वितीयपरिपश्व्याहुतिमाह कात्यायनः संज्ञप्तः
पशुरिति प्रोक्ते स्येतान्नु मुहूर्त्तमित्याहासोमदेवेभ्यः स्वाहेति जुहोति। न वेते जुहोति। न वेते जुहु
यादिति। शामित्रसंज्ञप्तः पशुरित्युक्ते सोमयागातिरिक्तस्थले श्येतान्नु मुहूर्त्तमिति प्रेषमाह।

ततो देवेभ्यः स्वाहेति एकामाहुतिं जुहोतीत्यर्थः। न चैते जुहुयात् स्वाहेति देवेभ्य इति
प्रथमो देवेभ्यः स्वाहेति द्वितीया एते उभे आहुती न वा जुहुयादित्यर्थः प्रकृते च त्वेषां देनि पु॰२
र्वतिति त्वात् इणमित्रा संकेतादिना संज्ञप्तः पशुरिति ज्ञापिते पूर्वाहुति होमावशिष्टाज्ये
न देवेभ्यः स्वाहेति जुहोति। यद्यपि श्रौते परिपशव्याहुत्योर्विकल्पस्तथापि इह परिपशव्ये
हुत्वा तूष्णीमपाशः पंचेति नित्यत्वात् पाठ नियम इति। तूष्णीमपराः पंच। अपराः पंचाहुतीः तू
२५ ष्णीं जुहोति तूष्णीमित्युक्तत्वाच्च प्रजापतिर्देवता सा देवतेति गम्यते। यत्तूष्णीं तत्प्राजापत्यं
तथा आनिरुक्तं प्राजापत्यमिति शाखान्तरीयश्रुतेः। आज्यं हव्यमनादेशे जुहोतिषु विधी
यते आज्यं वर्ण्यं देवतायाश्च प्रजापतिरिति स्मृतिरिति छंदोगपरिशिष्टवचनादप्ययमर्थो
लभ्यते। एवं च प्रजापतिमुद्दिश्य होमादिकं कार्यमिति। ततः पशोः बंधनं रज्जुं वपाश्रपणीभ्या २८

३०

मुत्तरस्यां दिशि क्षिप्त्वा प्रक्षिपतीति तदुक्तं तत्रैव कात्यायनेन। वपाश्रपणीभ्यां नियोजनीं चात्वाले प्रास्यानि
मा हिंभूरिति। वपाश्रपणीभ्यां करणभूताभ्यां नियोजनीं पशुबंधनरज्जुं चात्वाले विधिना संपादिते गर्ते प्रा
माहि उ रि ३ स्यति प्रक्षिपति मा हिंभूरिति मंत्रेणेत्यर्थः। प्रकृते च चात्वालस्याभावात् तत्प्रासनस्य प्रतिपत्तिरूपसंस्का
रत्वेनावश्यकत्वादुत्तरत उपचारो यज्ञ इति श्रुतेश्च उत्तरस्यां दिशि यत्र कुत्रचित् तूष्णीं कर्तव्यमिति। त
तः उपकल्पितं उदपात्रं हस्ते [illegible]नीय[illegible] पत्नी पशोः मुखादिषु उदपात्रस्थमुदकं प्रत्येकं प्रक्षिपति
तदुक्तं तत्र कात्यायनेन। पशोः प्राणानुत्सुंधति पत्नी मुखं नासिके चक्षुषी कर्णौ नाभिं मेढ्रं पायुं पादान् संहृ
त्य शाचं ते शुंधामीति प्रतिमंत्रमिति। प्राणान् प्राणायतनानि मेढ्रं प्रजननं शेषं प्रसिद्धमेवं प्रकृते मं
त्रस्य निवर्तितत्वात् तूष्णीमेव प्रत्येकं शोधनं भवति। नचाध्वर्य्वादीनामिति पत्न्या अपि नात्र कर्तृत्वं
किंतु स्वस्यैवेति वाच्यं पूर्वलिखित गोभिलसूत्रे त्र पत्न्या एककर्तृत्वदर्शनात्। पत्नी चोदकमादाय सर्वा

भिश्रोत्रांसि प्रक्षालयेतीति । ततः तदुदकशेषेण यजमानः पशोः शिरः प्रभृतीनि [अंगानि] षिंचति तदुक्तं दु-
कात्यायनेन शेषेण यजमानस्य शिरः प्रभृतीन्यनुषिंचति मनस्त इति ... यत्ते क्रूरमित्यंगानि शं महो-
भ्य इति पश्चात्सक्थ्योर्निषिंचतीति । शेषेण पत्नीकृतशौचानां कृतिः यजमानस्य करादधोर्युमध्य [शिरः प्र-
भृति] शिरः प्रभृत्यंगानि शिरो वाक् प्राणाश्चक्षुः श्रोत्रनाभिपायुचरणानि । अनुषिंचतः । मन
स्त इति शिरः मनस्त इति मंत्रेण शिरः अनुषिंचतः । यत्ते क्रूरमित्यंगानि शं महोभ्य इति पश्चात्सक्थ्योर्निषिंच
तः । शमहोभ्य इति मंत्रेण पश्चाद्भागे जघनप्रदेशे अवशिष्टं जलं निषतः । निषेने तस्य च पशुसंस्का
रत्वात्पशुशरीर एव पश्चाद्भागे निनयनमिति । प्रकृते च मंत्रस्याध्वर्योश्चाभावाद्यजमानः स्वयमेव तूष्णीं
ना१ शिरः प्रभृतीन्यंगान्यभिषिंचतीति । ततः पशुमुत्तानं कृत्वा तत्र नाभ्यग्रे भागे तृणं निधाय धृतां कितयासिना
धारयासतृणां त्वचं तीर्यकपाटयित्वा द्विधा भूततृणस्य मूलमादाय तन्मूलं निरस्त लोहितेनोभयतः अक्तो

पास्थ१ उत्तरलोष्ठीतिस्य कर्पानिष्कामशयतीति तदुक्तं तत्र कात्यायनेन । उत्तानं पशुं कृत्वाग्रेऽग्रनाभि तृणं निदधा
त्योषध इति स्वधीतः इति प्रज्ञातया ग्निनिधाय छित्वायं सव्येन कृत्वा दक्षिणेन मूलमुभयतो नक्ति लोहितेन
रक्षसां भागोसि इति निरस्त मिसपात्स्यतीति । प्रज्ञातया प्रकर्षेण ज्ञातया धारयासायां तत्रसास्त्रिः स्वया निदधा
तीसाद्दियज्जुष्टु तामेध्येत्तिः श्रते । अत्र च मंत्रस्य निर्वलितत्वात्तूष्णीमेताः क्रिया भवंति । तृणाग्रस्य सव्य
हस्तकरणं तु भवति । तस्य स्तोकाहुत्यर्थं सामिदाधानस्य च नापेक्षत्तृणाग्रप्रासनार्थत्वात् । प्रकृते च तदभावा
त् । सामिदाधानस्य नायत्तिश्चक्षतो यथा । स एतत्तृणमध्वर्युराहवनीये प्रास्यतिवा यावेस्तोकानामिति
स्तोकानां हैषासमिदिति । तृणमूललोहितांजनप्रासनेतु भवतः लोहितप्रतिपादनार्थत्वेन संस्कारक
त्वात् । एतद्वयं न भवतीत्यपि कातू । ततः वपां निष्काश्य वपाश्रयण्यौ आदाय प्रोर्णोतीति । तदुक्तं तत्र कात्यायने
न । वपामुत्खिद्य वपाश्रयण्यौ प्रोर्णोति घृतेन द्यावापृथिवी इति । ततः उद्धृत्य लग्नां वपां छेदनेन पृथक्कृत्य स्था१

क स्विदुत्तरेदेशे प्रक्षालयेत्। तदुक्तं तेनैव परिवास्य यात्वाले विसिच्येति। अकूले यथा त्वालस्याभावात्। उत्तरतः प्र
क्षालनमिति। अत्र परिवासनानन्तरं वपामभिधारयेत्। तथा च पूर्वं लिखितपारस्करसूत्रं। वपोद्धरणं चाभिधारयेदि
ति। वपोद्धरणं तस्याभिघारणं च कुर्यादित्यर्थः। अत्र चातिदेशप्राप्ताभिधारणानुवादेऽनर्थक्यात् पूर्वमेवाभिधारणा
न्तरं विधीयते। तस्य च पाठक्रमेणैव यानुष्ठानं समुचितमिति। वपापरिवासनोत्तरमभिधारणं युक्तमेव। अत एव का
रिकाकारः। नाभिमध्येतृणादिश्रया द्वाप्रोर्णवन्तीति कं। मूलं जननिरसनं केचिदाहुः तृणस्य तु। शेषं यथोदितं कुर्याद
वेलमत्रयोजनं परिवासस्य वपोद्धारं कृत्वा तमभिधारयेदिति। भेसः अग्नेः कन्नरतः स्थित्वा प्रतिप्रस्थाता शाखाग्न्यो
रन्तरेण हृत्वा स्वयं शाखाया बहिर्गत्वाऽग्नेर्दक्षिणतः स्थित्वा वपां श्रपयेत् [illegible]
नः (स्त
[illegible] तत्र कात्यायने नउत्तर [illegible] ष्ठ
अतप्य वपामन्तरा यूपाग्नी हृत्वा दक्षिणतः प्रतिप्रस्थाता श्रपयतीति परीत्येति। अत्र च प्रतिप्रस्थातुरभावात् शा

रो १ खाया श्च यूप कार्यं कारित्वा तस्य यसे व यथोक्तानूपदार्थानुके [illegible]ति ततः श्राप्यमाणां वपां स्रुवेणाभिधारयति। श्रपय
तेः सन्नाप्य विकारात् सान्नाय्ये च प[illegible]रिक्षालनान्तं कृत्वा सायंदोहमाहृत्य शतदोद[illegible]। श्रपयित्वाभिधार्योद्वास्येत्याभा
वनक्तीति सूत्रेण मृतस्यैव पयसः अभिघारणमुक्तमिति वपाया अपि विश्रपणाया एवाभिधारणं समुचितं न श्राप्य
माणायाः इति चेत्। न पाठस्रुवेणाभिधारयत्यग्निं शाल्मस्येतिस्तोकेभ्योनुब्रूयति मन्तायाः। भ्रत्ताप्रचरे त्याहस्र
तिप्रस्थातेति पशुप्रकरणीयसूत्रात्। श्रप्यमाणायाएवाभिधारणस्य लाभात्। ततो वपां कृत्वाहृत्य स्वासनेऽप
विश्य स्रुवेणाज्यं गृहीत्वा वपायां तूष्णीं प्राणदानं विधाय आज्यस्योत्तरत आसाद्यालम्भते। प्रणदानासादना
लम्भानां साज्ञाप्यधर्मत्वे नात्रातिदेशप्राप्तत्वात्। संस्कारकत्वाच्च करणं न विरुद्धं। ततः मध्यमाष्टकायां विशेष
स्योक्तत्वात् प्रथमाष्टकाधर्माः सर्वेऽपि मध्यमाष्टकायां भवन्तीति प्रथमाष्टकोक्तरीत्यैव आज्यभागाविष्टान्ति
रुः शत्यसारद्यादिभिर्द्वादशाहुतीश्च हुत्वा चरुणा शान्ता पृथिवीत्यादिभिः अस्तमोनुदुपात्। ततो वपाहोमार्थ

मासादिनमर्थपरिमाणस्रुवमुपादायसव्यहस्तेन कृत्वास्रुवांतरेण तदुपस्तीर्य तत्र हिरण्यशकल
मवधाय संपूर्णामेव वपां गृहीत्वा तत्रावधाय तदुपरि हिरण्यशकलमवधाय द्विः प्रत्युपस्तीर्य दक्षिणमुखः
सव्यं जान्वाच्य प्राचीनावीती नमो वः पितर इति मंत्रेण जुहोति इदं पितृभ्यो न ममेति त्यागः। उपस्तर
णादिप्रकारस्योक्तेः तत्र कात्यायनेनापयाप्यरिष्यंनुपस्तीर्य हिरण्यमवधाय वपामवधत्राहेंद्राग्निभ्यो
छागस्य वपायै मेदसोनुब्रूहीति हिरण्यमवधाय धाय द्विरभिधारणं सोमइति। नन्वत्र सूत्रे सामान्यतो वपावदान
स्योक्तत्वात्साम्नाय्यविकृतित्वेन प्राप्तस्य वपाया द्विरवदानस्यकेन बाधइतिचेन्न। उपस्तृणीतत्राज्यं तत्पृथि
रो७ व्यै रूपं करोति हिरण्यशकलमवदधाति तदग्ने रूपं क[रो]ति वपामवदधाति तदंतरिक्षस्य रूपं करोति हिरण्य
शकलमवदधाति तदादित्यस्य रूपं करोति अथ यदुपरिष्टादभिघारयति तद्दिवो रूपं करोति सा वा एषा पंचा
वत्ता वपा भवतीति श्रुतेः पंचावत्तात्वस्य श्रुतत्वाद्वपाया द्विरवदाने गृह्यमाने तद्विरोधिः स्यादिति। जु क्ता

मुपस्तीर्य हिरण्यशकलमवधाय कृ[त्वा]त्स्नां वपामवदाय हिरण्यशकलमुपरिष्टात्कृत्वाभिधारयन्नेत्येवं पंचा
[illegible] वत्ता भवति। चतुरवत्तिनोपि पंचावत्तं कस्यादित्यापस्तंबसूत्रादिष्ययमर्थो विसीयतो अथापि अग्नीषोमी
णी३ ये अथाज्यमुपस्तीर्य [अ]थ हिरण्यशकलमवधाय अथ वपामवधायाहाग्नीषोमाभ्यां छागस्य वपायै मेदसोनुब्रूही
त्यथ हिरण्यशकलमवदधात्यथोपरिष्टाद्द्विराज्यस्याभिधारयतीति द्विरभिधारणस्य स्रुतत्वात्तर्यावदानत्वं
स्य बाधितत्वेन अतिदेशप्राप्तं वपाया द्विरवदानं स्यादेव तत्र च सिद्धे वपा[य]याः द्विरवदाने तद्विक्षतिभूतस्रु
तपशोरसुतरां तत्प्राप्तिभाविष्यतीति चेन्न। ना [illegible]
[illegible]
[illegible] र्णेनिरूढे यथाविधावदानप्रकारमुत्का द्विरभिधारणं सोमइ
त्यनेनाग्नीषोमीये द्विरभिधार्येति काकरकसूत्रादिष्ययमर्थोध्यवसीयते। अनए वकासुदेवदीक्षिताः। स्पु[illegible]चो

पस्तरणं हिरण्यशकलावधानं द्विरभिधारणमित्येवमिति रश्वितवंतः॥ कारिकाकारस्त [illegible]
[illegible] अथस्त्रुवमुपस्तीर्य हिरण्यशकलं ततः द्विरवद्येद्वपां तत्र अलेखं स्वर्णमथोपरि द्विरूपस्तीर्यमग्नेणहुनेद्वैवपा य२
हरो३ मिति हरि [illegible] एवमाहावहरयामिति मंत्रस्य पारस्करेणोक्तेः मध्यभागगतस्यैव पां जुहोव देव यां आतवेदः पितृ
भ्यइतीति। एतस्य मंत्रस्य च पितृदेवत्यत्वाद्धोमस्यापि पितृदेवत्यत्वे सिद्धे तत्र विपर्यस्यपित्र्येषु सहृद्दक्षिणाचेति
परिभाषातः प्राचीनावीतित्वादिकं भवतीति अत्र केचित्तु अंगानां प्रधानवत्वारन्यायात् प्रधानस्य वपाहोमस्य प्रा
चीनावीतिना कर्तव्यत्वे तदंगानां उद्धरणमपत्नमभिधारणा प्रभृतीनां मपि प्राचीनावीतिनैव करणमित्याहुः।
नैतत्तु ततो रौद्रः राक्षसमासुरमासुरमाभिचरणिकं मंत्रमुक्त्वापित्र्यमात्मानं चालभ्यापस्पृशेदपइतिका ऽपऽप
त्यायनपरिभाषातः यज्ञोपवीती भूत्वाउदकं स्पृशेत्। ततो प्रति पात्ररूपसंस्कारत्वाद्वपाश्रयण्योः शसनं भव शोदपऽ प७
तीति यथा वपाश्रयण्योर्मध्ये याहि भंगावि आरवातां प्रागग्रां रुत्वाइतशां चप्रत्यगग्रां रुत्वाएकदेव तेउभेप्र

ग्नेप्रक्षिपति। तदुक्तं तत्र कात्यायनेन। हुत्वा वपाश्रयण्या वनुप्रास्यति प्राचीं विशाखां प्रतीचीमितराम् इत्या शाल
ते च इति प्रकृते च मंत्रमात्रस्यानिवृत्तिः उक्तहस्तोः मार्जन पशुपुरोडाशादेरप्यपशुसंस्कारकत्वाभावाद करणं। ततः
पशोरवदानानि गृह्णाति तथा च पारस्करः वपां हुत्वा वदानान्यवद्यति सर्वाणि पंचवेति। वपां हुत्वा अवदाना
नि श्रौतदृष्टरीत्यानि काशयति सर्वाणि त्रीणि पंचधेति विकल्पः। वपां हुत्वा वदानान्यव यतीत्युक्तत्वाद
पि पशुपुरोडाशादिकं न भवतीत्यवगम्यत इति। अवदानानि चोक्तानि कात्यायनेन। अंगान्यवद्यत्यभं जन्
हृदयं जिह्वां क्रोडः सव्यं सक्थि पूर्वनडकं पार्श्वे यकृत्तू वृक्कौ गुदमध्यं दक्षिणाश्रोणिमिति जोहवानि दक्षिण
सक्थि पूर्वनडकं गुदतृतीयाणि सव्या श्रोणिरित्येयभता नीति। हृदयं आम्रफलसदृशं हृदयेकमलं
जिह्वा प्रसिद्धा। क्रोडं वक्षः भुजांतरमित्यर्थः। सव्यसक्थि पूर्वनडकं [illegible] सव्यस्य बाहोः प्रथमनलकं आं
सादधो वर्तमानं द्वे अपि पार्श्वे दक्षिणं सव्यं च। एकैकं त्रयोदश वक्रास्थिसंयुक्तं। यकृत्तु कालेयं वृक्कौ

कुक्षिगीलकौ महदायत्लकनुत्थौ ॥ गुदं पञ्चाश्यस्या नं येन त्रा कान्निर्गच्छति तन्मध्यं तस्य त्रिधा यंत्रेधा विभक्त-
स्य मध्यमो भागः ॥ दक्षिणा श्रोणिः ॥ कटी दक्षिणा परसे सवथ्रु उपरि वर्त्तमानो मांसलप्रदेशः ॥ एतानि जोहवानि ।
जुह्वाम वदेयानि ॥ दक्षिणसक्थि पूर्वनलकं प्रथमनलकं [illegible] श्रांसादधो वर्त्तमानं गुदं तृतीयणिष्टं ॥ गु-
दस्य त्रिधा विभक्तस्य यः तृतीयो णिष्टो भागः ॥ सव्या श्रोणिः ॥ उत्तरापरस्य वथ्रु उपरिभ[illegible] मांसलप्रदे- गो॰
शः कटि[illegible]र्वाच्यः ॥ इति श्रपभृतानि ॥ उपभृत्य वदेयानीति ॥ अत्र सर्वाणि त्रीणि यं च वे स्युः कृत्वा देतानि
सर्वाण्यवद्यति ॥ ततो हृदयं शूले श्रग्नो प्रतप्य श्रपयति ॥ पशुं चोरवायामिति ॥ पशु श्रपणार्थे धोरवा[illegible] यां जु-
ह्वासे कः कार्यः ॥ त्रिः प्रच्युते पशौ शूलात् हृदयं निष्काश्य स्थाल्यां[illegible] स्थ वेदानो परि निधाय स्रुवेण पृष- स्या॰
दाज्यं गृहीत्वा हृदयमभिधार्य पुनराज्यस्थास्थाल्याज्यं गृहीत्वा स्थालीस्था[illegible]न्यवदानान्यव-
धार्य उद्वासयेत् । तदुक्तं तत्र कात्यायनेन त्रेभिता व॰ ८ ज्ञास्ति त्रिः प्राच्या वपा ताः त्रिः प्रच्युतस्य हृदयं

प्रतस्योत्तमं करोति शूलं चाभूमौ ॥ जुह्वां पृषदाज्यस्यादायोपनिष्क्रम्य पृषतीमतः ० हविः शमितारितित्रि-
रभिक्रामं प्रोक्ते [अ]भिधारणं चदर्शितिदेशप्राप्तिमिति स्थाल्याल्याज्येनैव तत्र सिंभवति पृषदाज्येन हृदयम-
भिधारयत्युत्तरतः परिक्रम्याज्येन पशुमित्यादि ॥ एतेन पृषदाज्येनैतदभिधारणं भवतीति परास्तं प्रकृते
था॰५ च शूलावभृ[illegible]भावात्तन्निधानं च न भवति जुह्वाभावान्नं त्रस्यानिवार्तितत्वाच्च स्रुवेण स्थालीमेवाभिधारणं
भवतीति ॥ ततउरवात ः श्रवदानान्युद्धृत्य पात्रांतरे उदकुसंस्थानि [ना] निस्थापयित्वा स्थाल्याज्येने-
व सर्वावदानपक्षे त्र्यंगवर्जितानि पक्षांतरे च सर्वाण्यवदानान्यनक्ति ॥ श्रयं च पदार्थो दर्शितिदेशप्राप्त[illegible] सं-
स्कारकत्वादनुष्ठीयते ॥ दर्शे च कात्यायनादिभिः दधिपयसोः समंजनमुक्तं ॥ तद्यथा ॥ सायं दोहमाहृ-
त्य आतरीदि ० अपयित्वाभिघार्योद्वास्योभावनक्तीति ॥ ततः श्रवदानान्यसिस्थ्यशगखास्त्योरंतरेण
नीत्वा श्राज्यस्य दक्षिणतः क्रमेण श्रासादयति ॥ ततः त्र्यंगवर्जितानि क्रमेणैवालभतेर्दुक्तं तत्र कात्या- तत्र

यनेन॥ पश्ववदानविधिवच्च॥ उत्तरतः प्रतिप्रस्थाता वेद्यां प्लक्षशाखास्ववद्यतीति॥ पशुः पश्ववदानानि वपा
वत्श्रं तत्रायूपाग्न्योरित्यर्थः॥ दक्षिणतस्त्वस्यवेद्यामासादयतीति शेषः॥ प्रतिप्रस्थाता वेद्यां प्लक्षशाखासु
ववद्यतिप्रतिप्रस्थाता कृत्विकुवेद्यां प्लक्षशाखासुनिधाय प्रत्येकमवदानानि खंडयतीत्यर्थः॥ श्रुतिस्था तंज
घने नचात्वालमंतरेण यूपंचाग्निंचहरंतिदक्षिणतो निधाय प्रतिप्रस्थातावद्यति प्लक्षशाखास्ववदानं बर्हिर्भ
वंतितात्र [illegible] वद्यतीति आसादानालभनेयदृशीतिदेशप्राप्ते एवं संस्कारं कृत्वा क्रियेते दर्शेष कात्यायनः॥ प्रि
येण धाम्नेतिहविर्विवेचनं कृत्वा जुवा आसादानीति सर्वाण्यालभंतइतिमंत्रमात्रस्यच प्रकृतोनि वृत्तिः॥ आ
सादनालंभनादिकं च प्रधानयागप्रयुक्तं न स्विष्टकृद्यागप्रयुक्तमिति पक्षेपि पृथग्भूते त्र्यंगरूपे स्विष्टकृद्द्रव्ये न
नभवतीति प्रकृतेपि प्राणदानादिकं किमपित्र्यंगेषु नभवतीति बोध्यं॥ ततः प्रधानहोमार्थमर्थपरि
माणस्रुवेणोपस्तीर्य हिरण्यशकलमवधाय प्लक्षशाखासु हृदयादिभ्यः प्रत्येकमसिनाद्विर्द्विरव

दायतस्मिन्स्रुवे प्रक्षिप्य स्थालीपाकमिश्रमाज्यवदानानि जुहोतीति पूर्वोक्तिरिति पारस्कर सूत्रात्स्थालीपाका
द [illegible] पि सकृदवदाय तत्रैव क्षिप्त्वा पुनर्हिरण्यशकलं तत्रावधाय सकृदभिघार्य विश्वेभ्यो देवेभ्यः स्वाहेति जुहो
तीदं विश्वेभ्यो देवेभ्यो न ममेति त्यागः॥ उपस्तरणादिकं चोक्तं कात्यायनेन जुहूपभृतोरुपस्तरणीतेव सा
होमहवन्यां पात्र्यां चमनोतायै हविषोवदीयमानस्यानुब्रूहीत्युक्ते स्रुवेणावद्यतीति यथोक्तं द्विर्द्विरशेषे गुदं तृ
तीयेवयाहिरण्यमिति॥ जुहूपभृतोः वसाहोमहवन्यां स्रुवेणद्विरुपात्र्यां चउपस्तीर्य मनोतायै हविषोव
दीयमानस्यानुब्रूहीति प्रतिप्रस्थाता उक्ते स्रुचोः जुहूपभृतोरवद्यति॥ प्रत्येकं हृदयादिभ्यः मध्या
त्पूर्वार्धाच्चगरुतापि यथोक्तं जोह्वानांजुह्वामौपभृतानांचोपभृति द्विर्द्विः जुह्वामुपभृति वैद्विर्द्विः ति
शेषचनो पभृत्येकप्रत्ययाप वचनात्॥ अशेषे गुदं तृतीये गुदस्य विषमं त्रेधा विभक्तस्य योमध्यमो भा
गोसमन्नोष्यमेव द्वेधा कृत्वा वद्यति॥ द्विवचनं भाग्नाभिप्रायं गुदं त्रेधा करोतीत्यस्य विमोपपश्योमध्यं

जुह्वां द्वैधा कृत्वावद्यतीति श्रुतेः। चपावद्धिरण्यं। उपस्तारणं सकृदभिघारणं प्रत्युपस्तारसत्वे प्राक् हिरण्यमवद्यतीति
ति। प्रकृते जुहूपभृतो रभावान्मनोता प्रैषादेश्च मंत्रत्वेन निराकरणात् स्रुवेणैव पूर्वलिखितरीत्या होमः कार्य इति
। पुनः स्रुव एवोक्तरीत्योपस्तरणादिपूर्वकं अंगादवदाय स्थालीपाकोक्तरीत्यावदाय स्विष्टकृद्धोमः कार्य इ
ति॥ अथ सर्वावदानपक्षे तु विशेषः प्रधानहोमार्थमवदानं गृहीत्वा हृदयादिषु सप्ताभ्यंगं कुर्यात्। सप्ताभ्यंग
२।५ स्य स्विष्टकृदर्थं शेषस्थापकत्वात्। एतस्मिन्पक्षे शेषादेवास्विष्टकृद्धोमस्य कर्तव्यत्वात्। शेषस्य शेषस्था
पकत्वं च कृतावत्कुंतस्मात्त्वस्य कस्य चहविषो वद्यति पुनरेव तदभिघारयतीति स्विष्टकृत एवं ततु न र
यात्। तथा मनिकरोत्यथ यदा स्विष्टकृते वलिनततः। पुनरभिघारयति नो हि ततः कांचन हविषोऽन्वाहुति॰
होष्यन्भवतीति। अवत्तशेषेभ्य एव च स्विष्टकृद्गणमिति। ततः आघारावाज्यभागौ महाव्याहृतयः सर्वप्रा
यश्चित्तं प्राजापत्यं॰ स्विष्टकृच्चेत त्रियं॰ सर्वत्रेति सूत्रान्महाव्याहृत्यादिप्राजापत्यांतान्नवाहुतीर्ब्रह्मणान्वार

ब्धो जुहुयात्। ततः संस्रवं प्राशय ब्रह्मणे पश्वंगं दक्षिणां निधाय अंगवर्जितान्यास्तभतो ततः प्रधानहोमार्थं स्रु
वे॰ उपस्तीर्य हिरण्यखंडं निधाय हृदयादिभ्यः सकाशाद्यथाक्रमं द्विर्द्विरवदाय स्रुवे प्रक्षिप्य स्थालीपाकाच्च सकृ
देवावदाय तत्रैव क्षिप्त्वा तदुपरि हिरण्यशकलं निधाय सकृदेव प्रत्युपस्तीर्य विश्वेभ्यो देवेभ्यः स्वाहेति जुहूयात्।
इदं विभ्यो देवेभ्यः स्वाहेति जुहुयात्। इदं विश्वेभ्यो देवेभ्यो न ममेति त्यागं विधाय स्विष्टकृदर्थं स्रुवे॰ण उपस्तीर्य
हिरण्यखंडं निधाय अंगेभ्यो दक्षिणसक्थ्यादिभ्योऽपि द्विर्द्विरवदाय स्रुवे प्रक्षिप्य चरू द्वयादपि सकृत्सकृद
वदाय स्रुवे क्षिप्त्वा तदुपरि हिरण्यखंडं निधाय द्विरभिघार्याग्नये स्विष्टकृते स्वाहेति जुहुयात्। इदमग्नये स्विष्ट
कृते न ममेति त्यागः। अथ हृदयादि सर्वावदानपक्षे प्रधानावदानशेषेभ्य एव स्विष्टकृद्धोमो भवतीति
विशेषः। ततो महाव्याहृत्यादिप्राजापत्यांतान्नवाहुतीरिति हरिहरः। वासुदेवकारिकाकारादृष्टपक्षमेदं लिखि
तवंतः। ततो द्वितीयदिनेऽन्वष्टक्यं। अन्वष्टकाकर्म तत्र पूर्वदिननियुक्तपशोः सव्यपार्श्वसक्थीभ्यां पूर्वोक्तान्यष्टकाव

तु॰ सर्वकर्मकर्तव्यं सर्ववदानपक्षे ऋपेण्याश्वस्थ्याएयनं ततो मा वास्याकुर्ध्वे रुद्राष्टम्यां तृतीयाष्टका साप्रा
जापत्या अभिध्याने रुद्रस्थाने प्रजापतिं ध्यायेत्॥ तत्र सिद्ध एव कालशाक आसाद्यते प्रोदस्य तेनाथ स्मिन्काले
प्रथमाष्टकायाम पूपहोमस्तत्र काले मनसा प्रजापतये स्वाहेति कालशाकं जुहुयात्॥ शेषं समानं प्रथमाष्टका
येति॥ कालशाकाभावे अवश्यकर्तव्यत्वात्॥ वास्तुके नापि कार्या॥ ततोपरेद्युः पूर्ववदन्वष्टकाकर्म॥ ततो भाद्रपदकृ
तु५ ष्णैकादश्यां रेवत्यां अष्टकासा शाकेन कार्या प्रजापतिर्देवता॥ तत्र प्रथमाष्टकावत्सर्वकर्म भवति॥ एतावानु विशे
षः आसादनेच रुस्थाली द्वयं तंडुलानंतरं कालशाकमासादयेत्॥ कालशाकसंबंधि सर्वकर्म प्राचीनावीतिना
प७ दक्षिणमुखेन च कार्यं अतएव तत्काले वो स्पर्शनं कार्यं अन्यत्तु यज्ञोपवीतिनेति॥ अपूपहोमस्थाने पि
तत्र्यः स्वाहेति एकामाहुतीं जुहुयात्॥ अत्र सर्वास्वष्टकासु आदौ अपूपादिभिराहुतिः तदनंतरं तत्र तत्रो
क्तस्थालीपाकेरितिगर्गः॥ अत्रचतुर्थ्यामष्टकायामपि सिद्ध एव शाक आसाद्यत इति तु युक्तं॥ अत्रापि न्वो

न्वष्टका पूर्ववत्॥ अथ मूलांगवास्तं कर्मोच्यते॥ एतस्य च नित्यत्वाभावात्तकपाकयज्ञकथनप्रसंगेन कल्पनकथस
देवलत्वयनेन पाकयज्ञत्वादेवपूर्वमुक्तं॥ काम्यत्वं चास्य पारस्करसूत्रात्॥ तथा च पारस्करः॥ शूलगवः स्वर्ग्यः
पशव्यः पुत्र्यो धन्यो यशस्य आयु[illegible]ष्य इति॥ स्वर्गकामस्य पशुकामस्य पुत्रकामस्य धनकामस्य यशस्का
आ४ मस्य पु[illegible]स्कामस्य च भवति॥ स च [illegible] तेविवचनसामर्थ्यात्तु सर्वेपि कामाः संपद्यंत एवेति॥ श्री अनंतः॥ अत्र
च स्वर्गादिकामानां पर्यायेण सिद्धिः॥ नहि युगपत्तु स्वर्गादिकामानामुत्पत्ति संभव इति कर्तव्यतां च स एवाह॥
है श्रौपासनमरण्यस्य हृत्वा [illegible] द्रं पशुमालभ्य मनेसांडं गोर्वाशवया शृ द्रापा८ श्रपयित्वा स्थालीपाकमवदानानि
चरुद्राय वपामंतरिक्षस्य वयाः स्थालीपाकमिश्राण्यवदानानि जुहोत्यन्नाय इत्यादिवनस्पतीस्विष्टकृदं
ते दिग्माधारणं तेपत्नीः संपाजयंती द्राण्यैक द्रारोय्ये नूर्वाल्यै भवान्या अग्निं गृहपतिं लोहितं पात्ना ज्ञो षुकूर्चे
षु रुद्राय सेनाभ्यो बलि हरंति यास्ताइत्यु वध्यं लोहितमग्नो प्राशयत्यथो वा निरवनत्यनुवातं पशुमवस्था

॥मि॰श्र॥
॥५६॥

प्यकर्द्रै रुप [illegible]तिष्ठते प्रथमोत्तमाभ्यां चानुकाभ्यां नैनस्य शोपयाम [illegible] ८-द्रं रंस्येतेनैव गोयज्ञो। व्याख्यातः पायसे
नानर्थलुप्तस्तस्य तुल्यवयागो दीक्षिणोति। औपासनमरण्य ८-हुत्वेति। उपासन साधनभूतं औपासनमावसथ्या
ग्निं अरण्यं वनं प्रतिहृत्वा तत्र वितानं त्रेताग्निविद्या संसाधयित्वा गार्हपत्याहवनीय दक्षिणाग्नीन्साधयित्वेत्यर्थः
।तत्र रौद्रं रुद्रदेवत्यं पशुं छागं सामान्यतोपि स्थूलः पशुशब्दः अग्नीषोमीय प्रकृतीशब्दत्वात् छागपरो बोध्यः।
आलभेत दैवतोद्देशेन नियुञ्ज्यात्कीत्यर्थः। कीदृशं छागं सांडं आंडाभ्यां वृषणाभ्यां युक्तं। अक्लीबमित्यर्थः। पशुं
विशेषयति गोर्वा शब्दादिति। वा शब्दः अवधारणे सपशुर्गौरेव भवति कुतः शूलगवइति शब्दात्। इयमाख्या
तदैवानुगतार्था भवति यद्ययं पशुर्गौः स्यात्। तस्माद्रौद्रेक वपा ८-मैं चरुं हृदयादीन्यवदानानि चसहैव श्रप पयि ता
यित्वा पशोर्गो गामित्रैव दानश्रपणं दृष्टं वपाश्रपणं दृष्ट्वा। वपाश्रपणं चादृष्टवशी [illegible] तेन्द्रैव भाभूदितीत
हश्रपणार्थं पुनर्वचनं [illegible] रुद्राय वसां अंतरिक्षाय वसां। अन्तः पतीत्यस्यानुषंगे न कश्रपणस्योक्तत्वान्निः

५६

प्रयोजनमितिनानुषज्यते अतः जुहोतीत्यध्याह्रियते। अपेक्षितत्वात्। एवं च यथोक्तं तेक रुद्राय स्वाहेति वपाहोमः
अंतरिक्षाय स्वाहेति वसाहोमः अर्कैः च स्थालीपाकमिश्राण्यवदानानि जुहोति [illegible] दावदानानि जुहोति तदा स्थाली य
पाकेन सह संयोज्य जुहोति। अवदानानि च हृदयादीनि पूर्वोक्तानि। अग्नये रुद्राय शर्वाय पशुपतये उग्राया शनये
भवाय महादेवायेशानायेति नवभिर्मंत्रैर्नव कृत्वो वदानानि जुहोति नवकृत्वोपि स्थालीपाकेन मिश्रीकृत्य जुहोती
त्यर्थः। वनस्पति स्विष्टकृतं अंते व्याधारणं। वनस्पतिः स्विष्टकृतः प्रक्रियमाणः वृषदाज्यसाधनको होमः स्वि
ष्टकृत्। असि इदं स्विष्टकृदंतरत्येव सिद्धे वनस्पति ग्रहणं तद्धोम प्राप्त्यर्थं सच यस्मिन्काले यथा तत्र दृष्टस्तथैवात्रापि
त कार्यः। व्याधारणं सोपि [illegible]द्वेवस्य होमशेष [illegible] साधनकस्तथैव तत्र दृष्टत्वात्। व्याधारणांते पत्नीः संयाजयंती
द्राण्यै भवान्या अग्निं गृहपतिमिति दिग्व्याधारणस्यांते अवसाने पत्नीः इंद्राण्यादीः संयाजयंति। द्वयस्व्यानु
क्तत्वात्तृजा धन्यैव। पशोस्तथैव दृष्टत्वात्। इंद्राण्या इत्यादिभिः पंच[illegible]भिर्मंत्रैः स्वाहा शब्दांतैः। लोहितं पालाशे

षु कर्चेषु द्रायसेनाभ्यो बलिं हरंति। आगं तूनामंते निवेशइत्युक्तत्वात् सर्वहोमांते संस्रवं आज्यशस्त तत स्ये
वत्नो दितं रक्तं पालाशानां इमानि पालाशशाखानि तेषु कर्चेषु। आसनेभूरुद्राय देवतायै सेनाभ्य स्व। सेनाश्रपि
रुद्रस्येव यास्तो रुद्र पुरस्तात्तेन भइत्य। दिमं त्रलिंगात्तु। ताभ्य श्च बलिं उपहारं हरंति दद्याति यास्ते रुद्र इत्यादि
भिः षड्भिः मंत्रैः। अर्थादेकैकस्मिन् कूर्चे एकैकेन मंत्रेण। ऊवध्यं लोहितं लिप्तमग्नौ प्राज्यस्य धोवानि रवनति
। ऊवध्यं पुरीष स्थानं पादीति प्रसिद्धं। लोहितं रुधिरेणो लिप्तं संस्रवं अग्नौ आहवनीय प्रास्यति प्रक्षिपति।
अधो वा भूमौ वा निखनति। गर्तं कृत्वा तत्र निदधातीत्यर्थः। अनुवातं वाताभिमुखं पशुं याग भ्यो भवस्थाय रुद्रैरु
त्तिष्ठते प्रथमोत्तमाभ्यां वानुवाकाभ्यां। वातं अनुगतं अनुवातं वाताभिमुखं पशुं यागेभ्यो वसिष्ठं पशुशरीरं अव
स्थाप्य निधाय रुद्रैः नमस्त इत्यध्याय परिपठितैः उपतिष्ठते। नमस्त इति समस्तेनाध्यायेनोपतिष्ठते
इत्यर्थः। पक्षांतरमाह। प्रथमोत्तमाभ्यां वा अनुवाकाभ्यां। अनुवाकु अरु कुसं योध्येत प्रसिधः। नमस्त इ

त्यादिभिः षोडशाऋस्यजुषात्मक प्रथमः। द्रापे अंधस इत्यादि विंशतिऋगात्मक उत्तमः। नैतस्य पशोर्ग्रामं हरंति
। एतस्य रुद्रदैवत्यस्य पशोः याग शिष्टं मांसं ग्रामं प्रति न हरंति न नयंति। एतेनैव गोयज्ञो व्याख्यातः। एवं शूलगवं ग
मुक्त्वा एतस्य विधिं गोयज्ञेति दिशति। एतेन शूलगवोक्त विधिना गोयज्ञनामकः कर्मविशेषः व्याख्यातः कथि
तः। परं तु पायसेनानर्थलुप्तः। पशुसाध्यसाधितश्चरुः पायसः परमान्नमिति यावत् तेन कार्यः नतु पशुनेत्यर्थः।
पशुः पयसा कथं सिध्येदित्याह। अर्थेन प्रयोजनेन न लुप्तः पायसेन याव्यानर्थः कर्तुं ग्राव्यतेतावान् कर्तव्यः। सर्वा
र्थः केवलः शूलगवप्रधानदेवताभ्यो होमरूपः। एवं यत्र पायसेन शूलगवप्रधानदेवताभ्यो होममात्रेणैव गो
यज्ञो भवतीति तात्पर्यः। तस्य शूलगवसाधनस्य पशोर्याव द्विसांवत्सरिकं त्रिसांवत्सरिकादिवयः तावत्तु वयोऽस्य
स्य सानुरूप्य वया। तावद्वार्षिक इत्यर्थः सदक्षिणां गोयज्ञे तु पशोरेवाभावात्कुत एतस्य तुल्यवयस्त्वं पूर्णपा
त्रादि कमेव दक्षिणा भवतीति केचिदाहुः। अपरे औदित्येन यथाकल्पयंतीति सत्रार्थः। अथ प्रयोगः। सतु हरि

द्वारादिलिखितमीसैर्वालिश्यते॥ स्वर्गपशुपुत्रधनयशाश्रेयुः कामानां मूलगवपशुं वंशोविहितः॥ तत्र मासपूजा
पूर्वकमाभ्युदयिकं श्राद्धं कृत्वा ॐ पासनाग्निमादायारण्यं गच्छेत्॥ तत्र समुचीदेशे गार्हपत्यायतनं सप्तविंशत्यंगुलैः
मंडलं वृत्तं विधाप तन्मध्ये निखात शंकोः एकादश द्वादशवास्यकीयानि पदानि [illegible] प्राचीं गत्वा तद्देशे शंकुं
निखायतयोः शंक्वोरुभयतः पाशं रज्जुं प्रसार्याहवनीयायतनं रचयेत् तस्याश्च प्रमाणरज्जुः स्यात्तावागमोभवे
त्॥ आगमार्द्धे चशंकुस्यान्तरदैर्घ्यं निरंछनमिति श्रुत्यवचनानुसारेण॥ अत्रयं रचनाप्रकारः॥ पूर्वस्माच्छंक्वोः
द्वादशांगुष्टपर्वपरिमितं देशं पूर्वतः पश्चिमतश्चापरित्यज्य तत्र शंकुद्वयं निखाय चतुर्विंशत्यंगुलां रज्जुं प
रिमाय तावतीमेव अधिकां गृहीत्वा उभयतः पाशौ कृत्वा रज्जोरागमार्द्धे शंकुस्थानं सूत्रादिनां कपित्वा अ
परागमार्द्धे निरंछनं आकर्षणसूत्रगुणमोच्य पूर्वार्धापशार्धयोः शंक्वोः तस्याः रज्वा पाशद्वयं निक्षिप्य नि
रंछनेन गुणेन दक्षिणत आकृष्य शंकुस्थाने शंकुं निखनेत्॥ ततस्तामेव रज्जुं उत्तरतो नीत्वा तथैवाकृष्य शंकुं

स्थाने अपरं शंकुं निखनेत्॥ अथ रज्वाः पशौ [illegible] पूर्ववत् निरंछनगुणेन दक्षिणतः आकृष्य शंकुं निखा
य पुनस्तामेव रज्जुं उत्तरतो नीत्वा तथैवाकृष्य शंकुस्थाने शंकुं निहन्यात्॥ एवं चतुरस्रं चतुर्विंशत्यंगुलं यामवि
स्तारमाहवनीयायतनं संपद्यते॥ ततो गार्हपत्याहवनीययोरन्तरालसंमितां रज्जुं षड्गुणां सप्तगुणां वा विभाज्य
षष्ठं सप्तमं वा भागमधिकं निक्षिप्य प्रसार्य त्रिगुणीकृत्य अपरत्रिवृत्तीये शंकुस्थाने अंकयित्वा गा
र्हपत्याहवनीयमध्यागतयोः शंक्वोः पाशौ प्रतिमुच्य गार्हपत्यादन्तमाद् दक्षिणतः आकृष्य अपरत्रिवृत्ती
ये शंकुं निखाय तस्मिन् शंकौ॥ अन्यरज्जुपाशं प्रतिमुच्य शतांगुलानि परिमाय चतुर्विंशत्यंगुलं विरच्य
तन्मध्यमशंकोर्न्यस्तावयोंगुलान्युत्तरतः परित्यज्य तत्र पूर्वापरायतां मंडलसंमितां रज्जुं निपात्य रेखा
मुल्लिखेत्॥ एवं धनुराकृति दक्षिणाग्न्यायतनं संपद्यते॥ अथ तामेव रज्जुं परिवर्त्य आकृष्य नीत्वा उत्तरतः वि
तृतीयेनाकृष्य वितृतीयस्थाने द्रंकं कुर्यात्॥ एवं वितानं साधयित्वा तेषु पंचभूसंस्कारान् कृत्वा गार्हपत्या

यतने ऽउपासनाग्निं स्थापयित्वा मृन्मयेन पात्रेण गार्हपत्यैकदेशमादाय आहवनीयायतने आह
वनीयं प्रणयेत् । तत एवमेव दक्षिणाग्निरव[illegible]देत् दक्षिणाग्निः आहवनीयस्य दक्षिणतो ब्रह्मासनमास्ती
र्य मूलगवेन रौद्रेण पशुना अहं पक्ष्येत्तत्र मे त्वं ब्रह्मा भवेति ब्रह्माणं प्रार्थ्य भवामीति तेनोक्तः आसने उ
पवेश्य उत्तरतः प्रणीताः प्रणीय पवित्रच्छेदनानि पवित्रे प्रोक्षणीपात्रं वज्रः स्रुवं तद्दर्भ तृणं च । इत्येता
नि पंच आसादयति । ततो रज्जुं शंकुं शम्यां अभ्रिं पुरीषाहरणं । उदकं सिकताः आच्छादनवस्त्रं ।
इत्यष्टौ उपकल्पयेत् । ततः पवित्रे कृत्वा प्रोक्ष[illegible]णीं संस्कृत्य वज्रं मंत्रवर्जं निस्तृण[illegible] प्रोक्ष्य प्रोक्षणीं निधा

मी य वज्रमादाय वेदिं मिमीते स्फ्येन आहवनीयस्य दक्षिणतः प्राचीं अरत्निं पश्चिमतः चतुररत्नीं । उत्तरतः
त्र्यरत्निं पूर्वतः अरत्निं । एवं परिमितां वेदिं त्रिभिः कुशैः परिसमुह्य उत्तरतो वज्रेणोत्करं परिलिख्य तदं
तिके वज्रं निधाय । तदुपरि वेदितृणं कृत्वा सतृणं वज्रमादाय तदुपरि तेन प्रहृत्य तदग्रेण पुरीषमादाय वेदिं

प्रेक्ष्य पुरीषमुत्करे हृत्वा पुनस्तथैव प्रहृत्य पुरीषमादाय वेदिं प्रेक्ष्य पुरीषमुत्करे वारद्वयं करोति । पुरीषकर
णां से दक्षिणोत्तराभ्यां पाणिभ्यां उक्तं मुष्टिन्यासं करोति । ततस्तृतीयप्रहरणादि तथैव तूष्णीं कृत्वा ब्रह्मन् पूर्वे
परिगृहीष्यामीत्यामंत्रितेन ब्रह्मणा परिगृहाणेत्यनुज्ञातः स्फ्येन वेदिं दक्षिणतः प्राचीं परिगृह्य पश्चि
मतः उदीचीं उत्तरतः प्राचीं परिगृह्णाति । अथ वेद्यां प्राचीस्तिस्रो लेखा उल्लिख्य नामिकांगुष्ठाभ्यां दक्षि
णप्रभृतिभ्यो लेखाभ्यः पृथक् पुरीषमादायोत्करे प्रक्षिप्य क्रमेण लेखाः संमृजति । ततो वेदिं [illegible] मानादि

क्र६ पदार्थाः स्वयं कर्तृकाः मंत्ररहिताश्च [illegible]त्विगंतराभावात् समाम्नायाभावाच्च अथाहवनीयस्य पुरस्तात्

धा उत्तरवेदिस्थाने पंच भूसंस्कारान् कृत्वा पूर्वार्द्धे शंकुं निधाय द्वात्रिंशदंगुलां शम्यामादाय चतस्र उत्तरवेदिं शम्या
मात्रीं मिमीते । ततस्तथैव रम्य[illegible] उत्तरवेदेः उत्तरतः चात्वालं मिमीते तद्यथा पुरस्तादुदीचीं शम्यां निपात्य स्फ्ये
न तावतीं लेखामुल्लिख्य तथैव दक्षिणतः प्राचीं । पश्चिमत उदीचीमुत्तरतः प्राचीं शम्यां निपात्य लेखामुल्लिखे

नू॥ एवं चतुरस्त्रं शम्याप्रमाणं चात्वालं संपद्यते ततः चात्वालमध्यस्याग्रेण प्रहृत्य पुरीषमादाय उत्तरवे
दीशंकुसमीपे प्रक्षिप्य अभिन्यासं विधाय ... एवं द्वितीयं प्रहृत्य पुरीषादानोत्तरवेदिपुरीषप्रक्षेपाभिन्या
सानुकृत्वा चतुर्थवेलायां अभ्रे यात्वालं खात्वा यावता पुरीषेण शम्यामात्री उत्तरवेदिः ... पूर्यते ता
वत्पुरीषादरणे न चात्वालादाय प्रक्षिपेत्॥ एवमुत्तरवेदिं स्वापयित्वा मध्ये प्रादेशमात्री चतुरस्त्रां ताभिः कृत्वा
प्रोक्ष[णी]भिः प्रोक्ष्य सिकताभिरुपकीर्य वाससाच्छादयति॥ अथ गार्हपत्ये पूर्णाहुतिवदाज्यं संस्कृत्य पंच
गृहीत्वा आज्यं प्रोक्षण्याद ... सोपयमनीका ... ग्नीतुध्य उत्त[र]वेदेः अ[ग्]नेय कोणस
मीपे वह्निं वेदि निनीय पंचगृहीतेन नाभिं व्याघारयति कोणे हिरण्यं पश्यन् यथा पूर्वं दक्षिणस्यां स्त्रुतयो
आघारयोत्तरापरस्यां ततो दक्षिणापरस्यां ततः पूर्वोत्तरस्यां मध्ये चाभिघार्य शेषमाज्यं स्त्रुचमुध्यम्यो
र्द्धमुत्क्षिपति॥ ततो नाभिं चैतु दारवैः परिधिभिः परिदधाति यथा प्रथमं उदगग्रेण पश्चिमतः अनंत

रं आगग्रेण दक्षिणतः ततः प्रागग्रेणोत्तरतः॥ ततो नाभिमध्ये गुग्गुलु सुगंधितेजन वृष्णे स्तुकाशीर्ष
ण्याः अभावे ... यानि द्रव्याणि॥ तदुपरि उपयमनीगतमग्निं स्थापयति॥ उपयमनीं तत्समीपे निवपति चात्वा
ले प्रणीयमानमग्निं ब्रह्मानुगच्छति॥ ततो यजमानः प्रणीताउक्षन्नुत्तरवेदेः उत्तरेण कुशासने प्रणीयाहव
नीयं परिस्तीर्य गार्हपत्यं वापाग्न्येयं सादयति॥ आज्यस्थाली संमार्गकुशाः सन्नहनी वष्कादत्ता निप
रिधयः॥ उपयमनकुशाः समिधः स्त्रुवः॥ आज्यं वपाश्रपणी चरुः ... स्थाली मूलं उत्स्यातंदुलाः दक्षि
णार्थं तुल्यवयाः गौः अनेति॥ उपकल्पनीयान्युपकल्पयति॥ बर्हिः प्लक्षशाखाः॥ त्रिगुणरशना॥ उपाकरण
तृणं द्विगुणा रशना॥ गोपशुः॥ आसिः॥ पात्रेजनी दधि हिरण्यशकलानि षट्॥ पलाशपत्री चेति॥ ततः आसा
न क्रमेण पात्राणि प्रोक्षति॥ कृष्णाय त्वा प्रोक्षामीति तंदुलान्॥ प्रोक्षातो आज्यस्थाल्या आज्यं निरूप्य वेदिं सध्यसं
गृहीता अ... आस्यास्वात्वा ब्रह्मन्नुत्तरं परिग्रहं ग्रहीष्यामीति ब्रह्माणमामंत्र्य परिगृहाणेति ब्रह्मानुज्ञातः पूर्वव

श्येन दक्षिणपश्चिमोन्नतं वेदिं परिगृह्यानुमार्ष्टि। आहवनीयमपरेण प्रोक्षणीरासाद्य प्रणीतोदकेन पाणी ध्रुवां नि
ध्यप्रणीतानां पश्चिमतः प्रागग्रं स्फ्यं निधाय तदुपरि इध्मं बर्हिषं चासादयति। ततः स्रुवं प्रतप्य संमृज्याभ्युक्ष्य
पुनः प्रतप्य निदध्यात्। आज्यमुद्वास्य प्रोक्षणीनामपरेण कृत्वा स्थूपावेक्ष्य प्रोक्षणीः कृत्वा वेदिं प्रोक्ष्य बर्हिश्च
प्रोक्ष्य एकदेशेन बर्हिर्मूलानि सिंचित्वा बर्हिर्विस्रंस्य सन्नहनं च विस्रंस्य दक्षिणेनादाय वेद्यां स्तृणाति। उदकृत्यसं
स्था। तथैव तृतीयभागं गृहीत्वा अंके कृत्वा सव्यस्थितं दक्षिणेनादाय अंकगतं सव्येन संमृज्य पूर्ववत् स्तृणाति बर्हिर्मू
लानि द्वितीयबर्हिर्भागाग्रैः छादयन् स्तृत्वा तृतीयं [illegible] भागमादाय स्फ्योपयद्धेन तथैव स्तृणाति पश्चादप
वर्गेण तदुपरि प्लक्षशाखा पास्तृणाति। अथाहवनीयं कल्पयति। ततो मध्यमदक्षिणोत्तरान् परिधीन् आहवनी
ये परिधाय आहवनीयमभ्यस्य अग्रे [illegible] र्वनीपं परीत्य पलाशशाखां निखनाति। तां त्रिगुणरशनया त्रिः परिव्य
यति। तत्र शकलमुपगूहति। रुद्राय त्वोपाकरोमीति उपाकरणतृणेन पशुमुपाकरोति। ततो द्विगुणरशनया तरान्तं

गं पशुं बध्नाति रुद्राय त्वा जुष्टं नियुनज्मीति शृंगस्यायां नियुनक्ति। अथ रुद्राय त्वा जुष्टं प्रोक्षामीति पशुं प्रोक्षणीभिः
प्रोक्ष्य शेषं आस्ये उपगृह्य अधस्तादुपोक्षति। ततः उपयमनकुशानादाय समिधौ अभ्यर्प्य प्रोक्षणीभिः प
र्युक्ष्य पूर्ववदाघारमाघार्य उत्तरं घारयन्ते स्रुचो अग्रेण ललाटं संस्रावेण पशुं समनक्ति। ततः स्रुवस्थिभ्यां पशो
र्ललाटमुपस्पृशति। स्वरुं सम [illegible] गुदस्य आसिं एकतः घृतेनाभ्यज्य निदध्यात्। अथाहवनीयस्योत्त
रतः स्फ्येन शामित्राय परिलिख्य आहवनीयस्योल्मुकेन पश्चाज्य शामित्रदेशे शाखाच्चात्वालान्नाहव
नीयान्तं पर्यग्निं कुर्यात् त्रिः। पुनरुल्मुकमाहवनीये प्रक्षिप्य तावत् प्रतिगच्छेत्। पुनराहवनीयादुल्मु
कमादाय पशुं कंठे बध्नाति वपाश्रपणीभ्यामन्वारभ्य उदग्गच्छेत्। तत्र वेदितृणद्वयमादाय शामित्रे उल्मुकं नि
धाय शामित्रस्य पश्चात् एकं तृणमास्तीर्य तत्र पशुं प्राक्शिरसं उदक्शिरसं वा उदक्पादं निपात्य आवर्तय
मानं मुखं संगृह्य तमनेन शामित्रेण संज्ञपयति स तु अन्यस्मिन् तृणे शामित [illegible] यजमानः आहवनीयं प्रत्येत्य

धाय

पूर्णाहुतिवदाज्यं संस्कृत्य स्वाहा रुद्रदेवेभ्य इत्येतामाहुतिं आहवनीये हुत्वा संज्ञप्ते पशौ देवेभ्यः स्वाहेत्यनेनैवा
ज्येन हुत्वा नु ल्मीम पशोः पंच जुहोति ॥ अथ वपाश्रपणीभ्यां नियोजनीं त्वात्वाले प्रास्य पत्नी जनीभिः पशोः प्रा
णशोधनं स्वयमेव करोति ॥ यथा ॥ मुखं नासिके चक्षुषी कर्णौ नाभिं मेढ्रं पायुं संहत्य पादान् एकैकं पात्रेजनीज
लेन स्पृशति ॥ शेषेण शिरःप्रभृति मुखनासिकाप्रभृति कर्णपर्यंतं पुनस्तथैवाप्याप्य ततोंगानि निषिच्य शेषं
पशोः पश्चाद्भागे निषिंचेत् ॥ तत उत्तान पशुं कृत्वा नाभ्यग्रे तृणं निधाय प्रज्ञातया सिधारयाभिनिधाय सतृणां
त्वचं छित्वा तृणमग्रं उभयतो लोहितेनाक्त्वा स तृणं भूमौ निरस्य तदुपरि स्वपंपादौ कृ[illegible]त्वा पुनरागत्यो
पविश्य वपामुत्खिद्य वपाश्रपणीभ्यां प्रोर्णोति छित्वाज्येनाभिघार्य शस्त्यान्य पशुं विशास्ति ॥ हृदयादी
नि सर्वाणि त्रिणि पंचवा यथाकामं अवदानान्यवेष्यजाद्वैनीचावधम्थनेउव ध्यमवधायसा भिश्रेपतप्य
उत्तरतः आहवनीये च शाम्रा [illegible] योरंतरेणाहृत्य दक्षिणेन चरुं पर्यग्निं कृत्वा वपामभिघारयेत् ॥ अथ त्रिः

प्रच्युते द्वेषुयं उपरि कृत्वा पृषदाज्येन हृदयमभिघार्य इतराण्यवदानान्याज्येन सर्वाणि च ऋयं गवा ग्रेम
भिघार्य स्थालीपाकमुद्धास्य अनंतरं मुखं व[illegible]पात्रं गानां च प्रणदानं कृत्वा वपादीति क्रमेण साध्य अंगानि
५३ शंगरवाग्न्योरंतरेणाहृत्य पवेष्यामासाद्य वपामवदाय अंगानि वालभ्य ब्राह्मणान्धारयेत् आज्यभागौ हुत्वा वपा
होमार्थं स्रुवे आज्यमुपस्तीर्य हिरण्यशकलमवधाय वपां गृहीत्वा पुनर्हिरण्यशकलं दत्वा द्विरभिघार्य रुद्रा
य स्वाहेति वपां जुहोति ॥ वपाश्र[illegible] पण्यौ चाग्नौ प्रास्यति ॥ ततः स्रुवातो वसां गृहीत्वा अंतरिक्षाय स्वाहेति जु
हुयात् ॥ अथावदानहोमार्थं स्रुवे उपस्तीर्य हिरण्यशकलमवधाय तद्दैवपात्रं गेभ्य प्रत्येकं द्विर्द्विरवदाय वदा
य स्रुवे क्षिप्त्वा स्थालीपाक वृसकदवदाय क्षिप्त्वा उपरि हिरण्यशकलं दत्वा सकृदभिघार्य सर्वाणि चेत्सं
ताभ्यं गं कृत्वा अग्नये स्वाहेति जुहोति [illegible] एवं पुनः स्रुवे उपस्तरण[illegible] शकलावधानं द्विर्द्विरवदानम
हणं सकृत् स्थालीपाकावदानं हिरण्य ॥ शकलावधानाभिघारणानि कृत्वा रुद्राय शर्वाय पशुपतये उग्रा

य अशनये भवाय महादेवाय ईशानायेत्येतैः ... मंत्रैः स्वाहाकारांतैः एकैकस्मै जुहोति एवं नव प्रधानहोमाः सं
पद्यंते ततः पृषदाज्येन वनस्पतये स्वाहेति होमं विधाय स्विष्टकृद्धोमार्थं स्रुवमुपस्तीर्य हिरण्यशकलं दत्वा
सर्वावदानपक्षे त्र्यंगेभ्यो द्विर्द्विरवदाय सकृद्वा गोरवदाय हिरण्यशकलमवधाय द्विरभिघार्याग्नये स्विष्टकृते
स्वाहेत्यग्नेरुत्तरपूर्वदेशे जुहुयात् ॥ ततः स्रुवेणावदानं गृहीत्वा आहवनीयस्य पुरस्तात् दिशः स्वाहा ॥ इदं दिग्भ्यः
॥ दक्षिणतः प्रदिशः स्वाहा ॥ इदं प्रदिग्भ्यः ॥ पश्चिमत आदिशः स्वाहा ॥ इदमादिग्भ्यः ॥ उत्तरतः विदिशः स्वाहा
॥ इदं विदिग्भ्यः ॥ मध्ये उद्दिशः स्वाहा ॥ इदमुद्दिग्भ्यः ॥ ततः आवमीं गृहीत्वा गार्हपत्ये ... स्रुवेणावदायावदाय
रुद्राण्यै ७ इंद्राण्यै स्वाहा ॥ इदमिंद्राण्यै ॥ स्वाहा इदं रुद्राण्यै ॥ शर्वाण्यै स्वाहा इदं शर्वाण्यै ॥ भवान्यै स्वाहा ॥ इदं भवान्यै ॥ अग्नये गृ
हपतये स्वाहा ॥ इदमग्नये गृहपतये ॥ एताः पंच पत्नीसंयाजाहुतीर्जुहुयात् ॥ ततः आहवनीये महाव्याहृत्या
नं॰ दि प्राजापत्यहोमांते संस्रवप्राशनांतं मूलगवपशुना तुल्यवयसं गां ब्राह्मणे दक्षिणां दद्यात् ॥ ततः पलाश

७२

पात्रेषु ... आकृसंस्थेषु वाप पशुलोहितेन भस्तीरुद्र पुरस्ताच्येनास्ताभ्य एष बलिः स्ताभ्यस्तेनमः ॥ इदं रुद्राय
सेनाभ्यः ॥ इति सर्वबलिषु त्यागः एवं यास्ते रुद्र दक्षिणतः सेनास्ताभ्य एष बलिः स्ताभ्य एष बलिः स्ताभ्यस्ते
नमः ॥ इदं रुद्राय सेनाभ्यः ॥ यास्ते रुद्रोत्तरतः सेनास्ता एष बलिः स्ताभ्यस्तेनमः ॥ इदं रुद्राय सेनाभ्यः ॥ यास्ते
रुद्राध्यस्तात्सेनास्ताभ्य एष बलिस्ताभ्यस्तेनमः ॥ इदं रुद्राय सेनाभ्यः ॥ उवध्यस्य लोहितानि तस्याग्नेः प्रक्षेपः
॥ अधो निखननं वा कृत्वा अनुवातं पशुमवस्थाप्य रुद्राध्यायेन नमस्त इत्यादिना प्रथमोत्तमाभ्यां ... वाकाभ्यां रु पा
द्रानुपस्थाय उदकमुपस्पृशेत् ॥ एतस्य पशोर्मांसं ग्रामं नानयेत् ॥ इति समाप्तः शूलगवः ॥

॥सिध्र॥
।५६॥

॥कृष्ण॥

[OrderDescription]
,CREATED=22.07.19 10:37
,TRANSFERRED=2019/07/22 at 10:53:01
,PAGES=56
,TYPE=STD
,NAME=S0001058
,Book Name=M-1962-PARSKARGRAHSUTRA MISHRIKASHITAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,